
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Complete
mss. 20/6/78

श्यामारहस्य पृष्ठे १२३

ॐस्वस्ति॥ ॐनमः पूर्णामायै॥ देवीदानवदैत्यकोटिनिवहान्संहारयंतीप्रिवां[...]
तमद्धेपूर्णमौलिमणिभिः संशोभितांघ्रिद्वयीम् नत्वाश्रीगुरुदेवतांघ्रिशिरसो[...]
तत्त्वावितः पूर्णानंदगिरिस्तनोतिमतिमान्श्यामारहस्याभिधम्॥
रतंत्रंचफेत्कारीतंत्रमेवच कालिकाकुलसर्वस्वंकालीतंत्रंचयामलम्
डामरंचैवकुमारीतंत्रमेवच॥ कुलार्णवंतथाकालीकल्पंभैरवतं[...]
कालिकाकुलसद्भावंतथाचोत्तरतंत्रकं गुह्यणंचमतंज्ञात्वासाधकानां[...]था
शुद्धबुद्धस्वभावार्थंवक्ष्यामिमोदकारिणम्॥ तत्रादौद्वाविंशाक्षरीविद्य[...] ॥
तदुक्तंस्वतंत्रे॥ क्रोधीपूर्णबिंदुसंयुक्तंत्रिमूर्त्याग्निसमायुतम्॥ त्रिर्लिखित्वा[...]वे
हूंकारद्वयमेवहि॥ मायाद्वंद्वंसमालिख्यदक्षिणेकालिकेपिच॥ पूर्ववत्सं[...]ना
निचोद्धरेत्परमेश्वरि॥ स्वाहांतेयंमहाविद्याद्वाविंशत्यक्षरीपरा॥ अनया[...]
विद्यानास्त्यन्याज्ज्ञानसाधने॥ कुमारीतंत्रेपि॥ अस्तिगुह्यतरंह्येतज्ज्ञानमेकंस
नातनम्॥ प्रत्युवाचसुगोप्यंचकथितुंनैवशक्यते ॥

ब्राह्मेमुहूर्तेउत्थायबद्धपद्मासनः सुधीः शिरस्थशुक्लवर्णसहस्रदलकमल
कर्णिकांतर्गतचंद्रमंडलांतस्थहंसपीठोपविष्टंनिजगुरुं शुक्लवर्णंशुक्लालंकार
भूषितंज्ञानानंदमुदितमानसंवराभयकरंवामांगस्थरक्तशक्तिसहितंवामे
धृतोत्पलयाप्रियया दक्षहस्तेनधृतचारुकलेवरंशांतंद्विभुजंद्विनयनंदिव्या
भिषेकेनगुरुणासंप्रदायानुगतंतन्नामपूर्वकंगुरुंध्यात्वामानसोपचारै
राराध्य ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं हसः श्रीअमुका
नंदनाथश्रीपादुकाममुकीदेव्यंबाश्रीपादुकांपूजयामिनमः इतिदशधा
विमृष्य दंडवत्प्रणामंभूमौकुर्यात् यद्व श्वेतांबरधरंगौरंश्वेतांबरविभूषितं
इत्यादिगुरुध्यानंतद्वैलक्षण्यविषयेबोद्धव्यं शक्त्यादौतु रक्तमाल्यांबरधरंरक्त
रक्तोपमवेष्टितं अस्मन्मते श्वेतवर्णमपिगुरोर्ध्यानांतर
मस्ति शक्तिविषयेत्वस्माभिः एवंवच्चंलिखिष्यामि ब्रह्मरंध्रसहस्रा
रेकर्णिकरधवलोगुरुरित्यादि अज्ञानतिमिरांधस्यज्ञानांजनशलाकया च

श्यामा
३

दुरुन्मीलितं येन तस्मै श्रीगुरवे नमः इति नमस्कृत्य तदाज्ञां गृहीत्वा मूलाधारस्था
त्रिकोणान्तर्गताधोस्वयंभूलिंगावेष्टिनी प्रसुप्तभुजगाकारां सार्धत्रिवलयां तडित्को
टिनिभां नीवारशूकवत्तन्वीं कुलकुंडलिनीं हूंकारेण त्रिकोणत्रिकोणमंडलान्नीत्वा चै
तन्यं विधाय चक्रक्रमं प्रवर्त्मना ब्रह्मदशान्तं नीत्वा तत्र परमशिवेन संयोज्य कुलामृतद्रवेणा
येत् तदुक्तं सहस्रारे महापद्मे श्वेते शिरसि निर्मले पूर्णेन्दुमंडलाकारं शुद्ध
स्फटिकसन्निभम् गंधानुलेपितं शांतं वरदाभयपाणिकम् मंदस्मितं नित्यमु
त्फुल्लकरुणार्द्रावलोकितम् प्रियायादक्षहस्तेन धृतं चंद्रकलेवरं वामे धृतोत्प
लायापि सुरक्तया सुशोभितं कुलार्णवे प्रातरुत्थाय मंत्रज्ञो ब्रह्मरंध्रे निजं गु
रुं स्मृत्वा देवीमयो भूत्वा तत्प्रभापटलावृतः तंत्रांतरे प्रथमं वाचं गुरुमा
यां लक्ष्मीबीजं समुद्धरेत् हसखफ्रें तथानंदभैरवः सहखफ्रें गुरुनामततया
शक्तिनाम श्रीपादुकां स्मरेत् एवमेव महामंत्रं दशधा प्रजपेत्सुधीः
मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिम् तस्मात्त्रिशिखामानीय

मध्यऊर्ध्वव्यवस्थितां नीलतोयदमध्यस्थविद्युल्लेखेव भास्वराम् नीवारशूकवत्तन्वी
भास्वरं मंडलोपमाम् तस्याः शिखायां मध्ये च परमोर्ध्वव्यवस्थितः स ब्रह्मा स शिवः
सेन्द्रः स एव परमः स्वराट् स एव विष्णुः स प्राणः स कालोऽग्निः स चंद्रमः इति कुंडलिनीं
ध्यात्वा सर्वपापैः प्रमुच्यते स सर्वमहापातकेभ्यः मुक्तो भवति सर्वमंत्रसिद्धिं लब्ध्वा
केवलं भैरवो भवतीति कुलचूडामणौ मूलादिब्रह्मरंध्रांतं कुलं ध्यात्वा पुनः स्मरे
त् प्रह्लादानंदनाथाख्यं सनकानंदमेव च कुमारानंदनाथं च वसिष्ठानंदनाथ
कं क्रोधानंदं शुकानंदं ध्यानानंदमतःपरं बोधानंदं सुरानंदं ध्यायेत्कुलमु
खोपरि महारससरोल्लाससहृदया घूर्णलोचनः कुलालिंगनसंभिन्नघूर्णितानशेष
मानसः कुलशिष्यैः परिवृताः प्रणतिः करुणेक्षणः वराभययुताः सर्वे कुलतंत्रार्थ
वादिनः एवं कुलगुरून्ध्यात्वा विश्वरूपकुलमातृकां कुलस्थाने समानीय स्नात्वानार्थं
तीर्थमाश्रयेत् शांतं गुरुं कुलेवच्छ सतं कुलसुखावहम् रहस्यमद्भुतं प्रोक्तं गो
प्यं पशुसंकटे कुलनाथं परित्यज्य ये शाक्ताः कुलसेविनः तेषां दीक्षा च या

श्यामा
४

गच्छन्नसिवाहायकल्पते तस्मात्सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् कुलीनः सर्व
विद्यानामधिकारीतिगीयते दीक्षः प्रभुः सत्यवाक्यात्मा सर्वमंत्रस्य पारगः अन्यच्च
[illegible] प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेप्यमृतायमानां अंतःपदव्या
मनुसंचरंतीमानंदरूपामबलां प्रपद्ये इति अहं देवी न चान्योस्मि ब्रह्मैवाहं न
शोकभाक् सच्चिदानंदरूपेणात्मानमितिचिंतयेत् प्रातःकृत्यं चावश्यकमेव
निंदाश्रवणात् उक्तं च यामले प्रातःकृत्यमथ कृत्वानुयो देवीमभ्यर्चयेत् न
रूपस्याद्विफलाशौचहीनाययाक्रिया समुद्रमेखले देवि पर्वतस्तनमंडले
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं त्रिधा नमस्कृत्य शय्यातः समु
त्थाय यथा नद्यादौ गत्वा कालिकारूपं सर्वं विभाव्य स्वगुरं रत्नाभिकां कुलदर्भमाला
भिकां तर्जनीपुष्पत्वाचम्य मूलेन स्मरन्मलापकर्षणं स्नानं कृत्वाचम्य ॐ अद्येत्या
दि कुलदेवस्य प्रीतये मंत्रस्नानमहं करिष्ये इति संकल्पं विधाय जले त्रिकोणं वक्रं
विलिख्य सूर्यमंडलादंकुशमुद्रया तीर्थमावाह्य हृल्लांते आत्मतत्त्वाय स्वा

हा विद्यातत्त्वाय शिवतत्त्वाय स्वाहा ॥ इत्याचम्य ॥ अथवा ह्रीं स्वाहा इति त्रिधा
चम्य आत्मानं त्रिः प्रोक्ष्य ॥ मूलं मृत्तिकया गलेपनं कृत्वा मूलं पठन् कुंभमुद्रया
त्रिर्जलमभिषिंच्य ॥ अंगुलीभिः श्रवणादीनि समष्टि द्वाराणि संरुध्य त्रिर्निमज्जेत् म
उक्तं कुमारीतंत्रे मृत्स्नानं विसृज्याथ ततो गत्वा जलांतिकम् मलापकर्षणं स्ना
नामंत्रस्नानं समाचरेत् विद्यया त्रिर्निमज्जेच्चैवमाचमेत्पयसा तथा कुलचूडाम
णौ मलरत्नो हरिन्नीलाविविधा मत्स्यगतयः ततोपः कुलजः शिष्यः स्नानरूपं परा
मृशत् दिवं सर्वमयो वीवपातालं स्मृतसंभवम् आचांतः कुलदर्भेण हृदर्भके
लकुंडकः कुलपात्रे सद्दूर्वाक्षसलिलं सललं ततः गृहीत्वा कुलदेवस्य प्रीतये स्ना
नमाचरेत् इत्थं संकल्प एवासौ कुलचक्रे जलेन्यसेत् कुलस्नानात्समानीय कुल
मुद्रांकुशेन च कुलतीर्थानि सर्वत्र समावाह्य शिवात्मकम् ततोयं च त्रिधा पीत्वा
त्रिधा च प्रोक्षणं ततः अंकुशमुद्रया ज्ञानार्णवे मुष्टिं बद्ध्वा दत्त करं तर्जनीं
कुशरूपिणी अंकुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमा तीर्थावाहनमंत्रो यथा

श्रीक्रमसंहितायां गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेस्मिन्
सन्निधिं कुरु अथ स्वतंत्रेपि जलं पठन्मूर्ध्नि तोयं मुद्रयांकुशसंज्ञया सिंचयावाहयेत्
देवि स्थाचमेत्साधकाग्रणीः आत्मविद्याशिवैस्तत्त्वैस्ततो यागगृहं विशेत् कुंभमुद्रया
यथा ज्ञानार्णवे दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा मुष्टिद्वयेन तु सावकाशं चैव मुष्टिं कुंभमु
द्राविदुर्बुधाः अन्यत्रापि नवच्छिद्राणि संरुध्य ततो मज्जन् त्रिधा सुधीः आत्मविद्याशि
वैस्तत्त्वैराचमेत्साधकाग्रणीः वह्निजायां परेद्दत्त्वा शुद्धेन पयसा प्रिये अथ ॐमणि
धरिवज्रिणि महाप्रतिसरे रक्ष रक्ष हुं फट् इति शिखाबंधनं स्थलेन तिलकं च कृत्वा पू
र्ववदाचम्य वैदिकीं संध्यां विधाय तांत्रिकीं च संध्यां च कृत्वा तर्पणं कुर्याच्च तदुक्तं कुमारी
तंत्रे प्रणवं पूर्वमुद्धृत्य मणिं धरे च धरीति च वज्रिणीति पदं प्रोक्तं महाप्रतिसरे तथा
रक्षद्वयं ततो हुं फट् स्वाहा च तदनंतरम् अनेनैव च मंत्रेण रक्षां कुर्याद्विचक्षणः रक्ष
णमिति शिखाबंधरूपेण वस्त्रांचलोग्रंथिं वा कुर्यादित्यर्थः श्रीशारदाटीकायां
उक्तेनैव प्रकारेण कृत्वा स्नानं च तांत्रिकम् वैदिकीं तांत्रिकीं संध्यां कृत्वा तर्पणमाच

रेच्च तांत्रिकीं संध्यां यथा तत्रैव पुनराचम्य विन्यस्य षडंगमिति मंत्रवित् वामहस्ते
जलं गृह्य गलितोदकबिंदुभिः सप्तधा प्रोक्षणं कृत्वा मूर्ध्नि मंत्रं समुच्चरेत् अवशि
ष्टोदकं हस्ते दक्षे संगृह्य बुद्धिमान् इडया चाकृष्य देहांतःक्षालितं पापसंचयम् कृ
ष्णवर्णं तज्जलं दक्षनासा विरेचयेत् दक्षहस्ते तु तन्मंत्री पापरूपं विचिंत्य च पु
रतो वज्रपाषाणे प्रक्षिपेदस्त्रमंत्रतः अन्यत्रापि षडंगन्यासमावर्त्य वामहस्ते ज
लं ततः गृहीत्वा दक्षिणेनैव संपुटं कारयेत्ततः शिववायुजलक्ष्मावह्निबीजैस्त्रिधा
पुनः अभिमंत्र्य च मूलेन सप्तधा तत्त्वमुद्रया निक्षिपेत्तज्जलं मूलं मूर्ध्नि शेषं विनि
धाय च शरीरांतःस्थितं पापं क्षालये साधकाग्रणीः ततो हस्तौ प्रक्षाल्य अथात्र
प्रयोगः पूर्ववदाचम्य षडंगन्यासं कृत्वा वामहस्ते जलं विधाय दक्षहस्तेना
च्छाद्य हं यं वं लं रं इति त्रिरभिमंत्र्य मूलमुच्चरन् गलितोदकबिंदुभिः तत्त्वमुद्रया
मूर्ध्नि सप्तधाभ्युक्षणं कृत्वा शेषजलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा इडया देहां
तःपापं प्रक्षाल्य कृष्णवर्णं पापरूपं तज्जलं पिंगलया विरिच्य पुरः कल्पितवज्र

पूपामा
६

शिलायां फडिति निक्षिपेत् ततो हस्तौ प्रक्षाल्य जले यंत्रं ध्यात्वा सर्ववर्णदेवतामावाह्य
देवतान्तं ऐं श्रीअमुकानंदनाथभैरवः तृप्यतां इति त्रिः सकृद्वा मद्योदकेन संतर्प्य
वह्नौ परमगुरुं तैवत्वं परमाचार्यगुरुं तर्पयेत् इति संतर्प्य ततो हस्तौ प्रक्षाल्य
गुरुं तर्पयेद्यथा श्रीअमुकानंदनाथभैरवः तृप्यतां इति त्रिः सकृद्वा दिव्यसिद्ध
मानवौघगुरून् तर्पयेत् ततो देवीं तर्पयेद्यथा जले यंत्रं विभाव्य तत्र देवीमावा
ह्य स्वाहांतेन मूलेन महाकालसहिता श्रीदक्षिणकालिका माता तृप्यतामिति संत
र्प्य एकैकांजलिना परिवारान् संतर्पयेत् तदग्रांगौ सायुधा सवाहना सपरिवारा
महाकालसहिता श्रीदक्षिणकालिका माता तृप्यतां इति त्रिः संतर्प्य दूर्वाक्षत
रक्तचंदनजपापुष्पादिनार्घ्यं निर्माय ह्रीं हंसः कुलमार्तंडाय प्रकाशसहिता
य इदमर्घ्यं स्वाहा इति त्रिरर्घ्यं कुलसूर्याय दत्वा सूर्यमंडले देवीं विभाव्य पू
र्ववदर्घ्यं कृत्वा देवीं साक्षिणीमुच्चार्य इदमर्घ्यं महाकालसहितायै दक्षिण
कालिकायै स्वाहा इत्यर्घ्यं दत्वा गायत्रीं यथाशक्ति प्रजप्य देवीहस्ते समर्पये

त् तदुक्तं कुलचूडामणौ कुलसूर्याय देवाय त्रिरर्घ्यं परिकल्प्य च देवीम्पि
तृप्तिं कृत्वा तर्पयेत् कुलवारिणा नंदिकेश्वरसंहितायां च ॥ यावन्न दीयते चा
र्घ्यं भास्कराय निवेदितम् तावद्विष्णुं शंकरं वा गणेशं वा सुरेश्वरमिति गुप्तसा
रे तर्पणादौ प्रयुंजीत तृप्यतां कुलभैरवः आवाहने स्थापितं स्वभैरवानिति कीर्त
येत् तत्र भैरवरूपेण देवीमपि च कालिकां तृप्यतां कालिका माता पिता भैर
वस्तृप्यतां एवमेव विधानेन यथाशक्त्या पितर्पयेत् मार्तंडभैरवायेति त्रिधा
वार्घ्यं प्रकल्पयेत् तंत्रांतरेपि दिनेशायोत्क्षिपेत्त्रिश्च वारिणा चांजलित्रयं
अष्टोत्तरशतावृत्त्या गायत्रीं प्रजपेत्सुधीः तदुक्तं तंत्रविमर्शिन्यां सूर्यमंडलवा
सिन्यै देवतायै नमः पूर्णमंजलिमादाय गायत्र्यानुत्रिरुत्क्षिपेत् यथाशक्ति
जपेद्देवीगायत्रीं तदनंतरम् गायत्री यथा कुमारीतंत्रे कालिकायै पदं प्रोच्य
विद्महे तदनंतरम् श्मशानवासिनीति धीमहि इति ततो वदेत् तन्नो घोरपदं
प्रोक्तं प्रचोदयात्पठेदिति अस्याः प्रसादमात्रेण महापातककोटयः सद्यः
प्रलयमायांति साधकस्य न चान्यथा रावणस्य वधाच्चैव रामचंद्रो विमोहितः

श्यामा
७

मात्रवधात्परस्तु यामो मोचिताः स्यात्प्रसादतः नित्यकन्याकर्षणाच्च ब्रह्महत्यावैव वि
मोहितः सुरापानाच्च स्त्रीहत्या गोहत्याच्चैव यत्नथैव च एवमेव महाविद्यायोग
व्याप्तु वि सुंदरि महापातकयुक्तोपि सम्प्रजपेद्दशदायदि सत्यं सत्यं महादेवि मु
क्तो भवति तत्क्षणात् अथ कुलचूडामणौ उत्थाय कुलवस्त्रे द्वे परिधाय कु
लेन च तिलकं कुलतः पंचतत्त्वाचमप्यं कुलेश्वरि मोक्षार्थं रक्तवस्त्रे द्वे भोगार्थी वै
श्वेतवाससे मारणे कृष्णवासस्तु वशीकरणे सदा रही उच्चाटने धूम्रवर्णं रक्त
वस्त्रं तु भवकर्मणि परिधाय ततो मंत्री यागभूमिं समथाविशेत् ततस्तु साधका
श्रेष्ठो हृदि मंत्रं परामृशन् अवहिमीत सो योगी योगभूमिं समथाविशेत् कुलश
स्त्रं करे कृत्वा गत्वा द्वारि महेश्वरि एतत्स्थानं समाश्रित्य शिवं ध्यायेत् क्षा
लयेद्धस्तपादौ च वदस्य माणेन वर्त्मना कुमारीकल्पेपि ॐ वज्रोदकि हूं फट्
स्वाहा मंत्रेण मंत्रवित् जलमानीय सम्येनु आसनं शोधयेत्ततः प्रणवं पूर्वमुद्
धृत्य लक्ष्मीबीजं तथैव च ततो विशुद्धं ते सर्वपापानि शमयेति च अशेषं तेविक
ल्पं स्यादपनीयततत्परम् कूर्चबीजं भवेन्मंत्रं पादप्रक्षालनं प्रिये याग

स्थानानि यथा तदुक्तं फेत्कारिण्ये एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे मंत्र
स्थः साधयेद्योगी विद्यां त्रिभुवनतारिणीम् पंचक्रोशं तरे यत्र न लिंगांतरमीक्ष्यते
तदेकलिंगमाख्यातं तत्र सिद्धिरनुत्तमा अन्यत्रापि उद्याने पर्वते वापि निर्जने वा
चतुष्पथे देवागारे देवस्थले बिल्वमूले नदीतटे स्वगृहे निर्जने रात्रौ सा मे तथा वाम
यन्ते विधौ एतेषामन्यतमं स्थानमाश्रित्य ॐ वज्रोदकि हूं फट् स्वाहा अनेन
जलमानीय आसनमभ्युक्ष्य उपविश्य ॐ ह्रीं विशुद्धं सर्वपापानि शमय अशे
षविकल्पमपनय हूं अनेन हस्तौ पादौ प्रक्षाल्य पूर्ववदाचम्य सामान्यार्घ्यं
कृत्वा गृहदेवता पूजयेत् तदुक्तं तंत्रांतरे ततश्चाचमनं कृत्वा सामान्यार्घ्यं नि
वेदयेत् त्रिकोणवृत्तचतुरस्रं मंडलं रचयेत्ततः आधारशक्तिं संपूज्य तत्राधारं
विनिक्षिपेत् अस्त्रेण पात्रं संशोध्य क्लीं हृन्मंत्रेण पूरयेत् निक्षिपेत्तीर्थमावाह्य
गंधादीन्पूरयेत्तु दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमिदं स्मृतं सामान्यार्घ्योद
केनैव प्रोक्षयेद्द्वारदेवताः धेनुमुद्रा यथा अन्योन्याभिमुखं श्लिष्टा कनिष्ठानामि
काद्युतः तथा च तर्जनीमध्यधेनुमुद्रा प्रकीर्तिता द्वारदेवताः यथा तदु

र्वतंत्रे ॥ गणेशं क्षेत्रपालं च वटुकं योगिनीं तथा ॥ गंगां च यमुनां चैव लक्ष्मीं वाणीं
च पूजयेत् ॥ कुमारीकल्पेपि ॥ गां बीजाद्यं गणेशं च वामाद्यं च वटुकं तथा ॥ क्षामाद्यं
क्षेत्रपालं च यामाद्यं योगिनीं तथा ॥ ऊर्ध्वं वामे दक्षिणे च अधश्चैव प्रकीर्तितम् ॥
अथ प्रस्तारभट्टीये यथा द्वारोर्ध्वे गं गणेशाय नमः वामे क्षां क्षेत्रपालाय नमः दक्षे
वां वटुकाय नमः अधः यां योगिनीभ्यो नमः श्रीं लक्ष्म्यै नमः ऐं सरस्वत्यै नमः
इति पूर्वादिद्वारचतुष्टये संपूज्य वामांगसंकोचेन गृहं प्रविश्य नैरृत्यां ब्रह्मणे न
मः वास्तुपुरुषाय नमः इति संपूज्य अक्षतसिद्धार्थैः भूतान् संत्रासयेत् गंध
र्वतंत्रे भूमिष्ठो मस्थिता विघ्ना विघ्नहेतुर्महावनैः सिद्धार्थैस्तिलसंमिश्रैः
प्रोक्षायेवासने विशेत् अन्यत्रापि भूतापसर्पणं कुर्यान्मंत्रेणानेन साधकः स्थि
तेषु नत्रश्च गेषु नैवेद्यं मंडलेमथा विलुंपंति सदा लुब्धा नश्यंति च देवताः त
स्मादेतेन कर्तव्यं भूतानामपसर्पणम् कुमारकल्पेपि प्रणवं पूर्वमुद्धृत्य
सर्वविघ्नान् ततः परम् उत्सारय ततो हुं फट् स्वाहा चानंदनं तरम् अनेनैव च मं
त्रेण विघ्नानुत्सारय हुं फट् स्वाहा इत्यनेन सिद्धार्थान् तत्रिलोलीराच मुद्रया

भूतापसर्पणं कृत्वा मुष्टिः निस्सृतजलेन भूमिशोधनं कुर्यात् ओं रक्ष रक्ष हुं फट्
स्वाहा अनेन भूमिमभिमंत्र्यासनं संस्थापयेत् गंधर्वे कुमारीकल्पे प्रणवं पू
र्वमुद्धृत्य रक्ष रक्ष ततः परम् हुं फट् स्वाहेति मंत्रेण भूमिं च परिशोधयेत् ततः
पवित्रवस्त्रादौ प्रणवं पूर्वमुद्धरेत् चर्मे हृदयं ततः चैव फट् स्वाहा ततः नंतरम्
अनेनैव च मंत्रेण कुर्याद्भूम्यभिमंत्रणं अथासनानि यथा मृद्वास्तृत्वकमासी
नः चान्येषु कोमलेषु वा विष्टरेषु समासीनः साधयेत्सिद्धिमुत्तमाम् मृदादि
लक्षणमाह अर्वाक् पंचमासतो गर्भं च मृतमातृकं मृदं बुधाः चूडोपनयनेहीनं मृ
तं वा शूद्रकं विदुः निःसृतः चूडाकरणो हीनोपनयनः पुमान् योमृतः पंचमेव
र्षे तमेव कोमलं विदुः रुद्रतंत्रेपि कंबले लोहिते वापि दुकूले वा व्याघ्रचर्मणि
संन्यासी ब्रह्मचारी वा शैलं शारूप्य चर्मणि अन्यत्रापि कृष्णसारं द्विपचर्म व्याघ्रजं
कंबलं तथा पीतवस्त्रं च सूत्रं वा आसनानि प्रकल्पयेत् अत्र भूजासनमावश्य
कमेव तदकरणे प्रत्यवायः श्रूयते गंधर्वे मुंडमालातंत्रे व्याघ्राजिने स
र्वसिद्धिर्ज्ञानसिद्धिर्मृगाजिने वस्त्रासनं रोगहरं वेत्रजं श्रीविवर्धनं कौशेयं पुष्टि

दं प्रोक्तं कंबलं सर्वसिद्धिदम् मृत्तं वा यदि वा हस्तं विशेषाद् कृत्तिकं शुभम् मृदुको
मलमालीयं संग्रामपतितं चयत् तेन तु वा यदि तं वा पिष्टं वानरमासनम् ग
र्भच्युतत्वचं वापि नारीणां योनितंत्वचम् सर्वसिद्धिप्रदं देवि सर्वभोगसमृद्धिदं
त्वचं वा यौवनस्थानां कुर्याद्धीरो मृगासनम् श्मशानकाष्ठचारितं पीठं वा यत्नदा
रुतम् नदीक्लिन्नो विशेषाद्वा शुभदं स्मृणाराद्भिन्नेष्वहो एतद्विनाप्रत्यवायः सौम्यत्रि
कोणमालिख्याधारशक्त्यादिपूजनं मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छंद ईरितं
कूर्मो वै देवता चैव मासनारोपणे प्रिये विनियोगस्तु कथितः पठेद्वा सनेन
तः पृथ्वि त्वया धृता लोका त्वं देवि विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु
चासनं इति ध्यात्वा तु देवेशि कुर्यात्तत्रैव दापयेत् मायाबीजं समुच्चार्य त्वाधा
रशक्तिमर्चयेत् कमलासनमालिख्य हूं नमोंतं प्रपूजयेत् कुमारीकल्पे ॥
ओंकारांते सुरेखे च वज्ररेखे नमः परम् हूं फट् स्वाहेति कुर्यात्तु मंडलं च शवासने
वीरासने नोपविशेत् संपूज्यासनमेव च अत्र प्रयोगः आसनोपरि त्रिकोणं त्रयं द
त्वा ह्रीं आधारशक्तिकमलासनाय नमः इति संपूज्य अः सुरेखे वज्र

रेखे हूं फट् स्वाहेति मंडलिकां कृत्वा तदुपरि एवं विधिनासनं संस्थाप्य पद्मस्वस्ति
कवीरासनाद्यन्यतमासनेनोपविश्य कामाख्याभिमुखो विजयां स्वीकुर्यात् तदु
क्तं भावचूडामणौ विना हेतुकमास्वाद्य चोमयुक्तो महेश्वर तद्रूजां मम संकुर्यान्न
ध्यानं न विचिंतनम् तस्माद्भुक्त्वा च पीत्वा च पूजयेत्परमेश्वरीम् विजयकल्पेपि
संविदासवयोर्मध्ये संविदेव गरीयसी संविन्प्रयोगसंज्ञेना दीक्षिता याः साधकोत्तमैः
कर्तव्यस्तु महापूजा करणीयास्तु विंदतीति अन्यत्रापि आनंदेन विनाप्येशो न च
तृप्यंति देवताः इति तस्माद्विजयास्वीकारो वश्यं पूजादौ कर्तव्यः सा तु तः चतुर्धा ब्रा
ह्मणी क्षत्रिया वैश्या शूद्रा च श्वेत रक्त पीत नील पुष्पभेदात् तासां शुद्धिक्रमेण
लिख्यते तदुक्तं विजयाकल्पेपि संविदेवत्वसंस्पृजेद्भूत्वा पुत्रि सदानवे भैरवानां
वच्मपर्थं पवित्रा भव सर्वदा ओं ब्रह्मण्यै नमः स्वाहा इति मंत्रेण शोधयेत् सिद्ध
मूलक्षये देवि हीनबोधप्रबोधिनी राजप्रजावशंकारि शत्रुपक्षनिकृंतिनि ऐं
क्षत्रियायै नमः स्वाहेति मंत्रेण शोधयेदपरं ततः अज्ञानेंधनदीप्ताग्ने ज्ञानाग्नि
ज्वालरूपिणी आनंदस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ह्रीं वैश्यायै नमः

स्वाहा शोधयेत्तदनंतरम् नमस्यासितमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये
मातः समाधिफलदा भव ह्रीं रुद्रायै नमः स्वाहा कथितं मंत्रमुत्तमम् ॐ अस्त्र
नेत्रमृतोद्भवे अमृतवर्षिणि पदं ततः अमृतमाकर्षय द्वंद्वं सिद्धिं देहि ततः प
रम् अमुकं मेऽजितं याद्वशमानय ततः परम् द्विठांतोयं मनुः प्रोक्तश्च ततस्त्वेण
सप्तवारं तस्योपरि धितियोजयेत् आवाहनादिमुद्राश्च धेनुर्योनी ततः परम् दिव्यं ध
क्षौटिकासिद्धता लत्रय पुरःसरम् दिव्यदृष्ट्या नयापार्श्विचानेविद्यात्द्विवानयेत्
सम्यधात्तर्पयेद्भूतले प्रस्फुलेत्तप अमृतम् पुष्पं च ऽसहस्रारेतया संकेतमुद्रया
त्रिधैव तर्पयेद्भक्त्या साधकः सिद्धिमानसः ऐं वद वद ब्रूयाद्वाग्वादिनी पदं ततः
मम जिह्वाग्रे स्थिरी भव सर्वेति च पदं ततः सत्त्व वशंकरि स्वाहा मंत्रेण हृदयाब्ज
स्थे संकेतमुद्रयात्तदनुद्रयेत्पथि: एवं विधिना विद्यां स्त्री हृत्वानंदमयो
कृत्वा वामकर्णोर्ध्वे श्री अमुकानंदनाथगुरुपादुकाभ्यो नमः दक्षकर्णोर्ध्वे
गं गणपतये नमः मध्ये ऽदृष्टदेव्यै नमः ऽजितमहृद्गत्य पूर्ववत्सामान्यार्घं
हस्ताजेनोदकेन पूजोपकरणं चाभ्युक्ष्य स्वदक्षिणे गंधपुष्पादिकं वामे तु

गंधितं लं देवतायाः पश्चिमे कुलद्रव्याणि अन्यत्पात्रं च वामे धारयेत् तत्कुलं बालक
ब्रामणे कुलासनं ततः शिवाजदम्पर्च्य यथासुखम् कुलासनं ततो बद्ध्वा गुरुस्य
क्रमेण तु आत्मशुद्धिं स्थानशुद्धिं देवशुद्धादिभैरव कृत्वाचार्यं ततो विद्वान्
कुर्यात्कुलविचेष्टितम् दीक्षितानां कुलीनां युवतीभिः कुलाचर्मिः देवतापुरुष
कामिः संवित्तं यागभूमिषु नानाविधानि पुष्पाणि गंधानि विविधानि च कर्पूरादीनि
धूपादिवासितं पटवासितं तांबूलदेयद्रव्यं च धूपदीपादिकं चयत् सर्वालंकार
भूषाभिर्भूषितः कौलिकेश्वरः मूलमंत्रस्य मंत्रतोयैः प्रोक्षितं स्थापयेत्ततः सर्वस्वं
दक्षिणे स्थाप्य वामे चार्घ्यं निवेदयेत् पश्चिमे देवतायाश्च कुलद्रव्याणि धारये
त् पश्चिमे पृष्ठेऽन्यथा: कालिकापुराणे मदिरां पृष्ठतो दद्यादन्यत्सर्वं च वाम
तः कुमारीकल्पेपि अधिष्ठाने तु पुष्पस्य मण्डलं स्वर्वं मुद्रयेत् शतामिषेकेति पदं
शतामीति ततः परम् शतामिषेकेति पदं प्रोक्तं हूं फट् स्वाहा ततः परं प्रणवं
पुष्पकेतुस्वराज्ञाहेति पदं ततः शतायसमर्पयामि तच्चास्तु संगव ह्रीय हूं मिति पु
लेपुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे पुष्पप्रचयावकीर्णे हूं फट् स्वाहा ततः

श्यामा
११

परम् विशुद्धपुष्पमात्रे तिलं पूर्ववदाहरेत् अथ वामपार्ष्णिघातत्रयं कृमोदत्वा
तर्जनीमध्यमाभ्यां पार्श्वयो तालत्रयं तर्जन्यंगुष्ठयोगेन छोटिकाभिर्दशदिग्बंधनं कृत्वा
दिव्यदृष्ट्या दिव्याद्विघ्नानिरस्य चतुर्दिक्षु वह्निप्राकारं विचिंत्य प्राणायामत्रयं कुर्यात्
[illegible] तंत्रे पार्ष्णिघातकरास्फोटसमुद्भूतिचक्रकैः तालत्रयमर्यादघात्स्व
शाहं संप्रदायतः ऋतुचंद्रैर्नेत्ररामैरसैर्वेदाधिकैस्त्रिये मात्राभिः प्रणवं त्रमात्र
रकुंभकरेचकैः प्राणायामत्रयं कृत्वा भूतशुद्धिं ततश्चरेत् [illegible] मनोवीचाम
नोः शुद्धिं प्राणायामेन जायते कालीतंत्रेपि प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन
वा [illegible] कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणम् प्राणायामः स विज्ञे
यस्तर्जनीमध्यमे विना मात्राभिः प्रणवं ज्ञात्वा पूरकुंभकरेचकैः प्राणायामत्रयं
कृत्वा भूतशुद्धिं ततश्चरेत् तत्रायं क्रमः मूलाधारे मनः संयोज्य दक्षांगुष्ठेन दक्ष
नासापुटं धृत्वा मूलमंत्रं प्रणवं वा षोडशवारं जपन् वामेन वायुमापूर्य कनिष्ठाना
मिकाभ्यां वामनासापुटं विधृत्य तमेव चतुःषष्टिवारं जपन् वायुं कुंभयित्वा पुनस्त
द्द्वात्रिंशद्वारं जपन् वायुं रेचयेत् एवं क्रमो व्युत्क्रमेण वारत्रयं कृते एकः प्राण

यामो भवति एवं वारत्रयं कुर्यादिति अथ मूलाधारात्कुंडलिनीं हंसः इति मंत्रेण
पृथिव्या सह स्वाधिष्ठाने आनीय तत्र जले पृथिवीं लीनां विभाव्य तस्माज्जलेन सह
मणिपूरे समानीय तत्रस्थ वह्नौ जलं विलीनं विभाव्य तस्माद्वायुना सह विशुद्धे
समानीय तत्रस्थाकाशे वायुं विलीनं विचिंत्य तस्मादाकाशेन सहाज्ञाचक्रे समानी
य तत्रस्थ मनस्याकाशं विलीनं कृत्वा मनो नादे विलीनं विभाव्य ध्वनौ ध्वनिं समर्प
येत् ततः सहस्रदलकमलकर्णिकां तस्य चंद्रमंडलमध्यगतत्रिकोणं तर्गतबिं
दुरूपपरमशिवे तां समर्प्य प्राणायामविधिना यमिति वायुबीजं धूम्रवर्णं जप
न् शरीरं संशोध्य रमिति वह्निबीजं रक्तवर्णं चतुःषष्टिवारं जपन् शरीरं पापं संदह्य
वमिति बीजं शुक्लवर्णं सहस्रारे विचिंत्य द्वात्रिंशद्वारं जपंस्तदुद्भवामृतवृष्ट्यानि
ष्पापं शरीरमुत्पाद्य ललाटसंडजिति पृथिवीबीजेन पीतवर्णेन शरीरं सुदृढीकृत्य
सोहमिति मंत्रेण कुंडलिनीमध्यतलोलीभूतां पंचभूतानि जीवात्मानं च ब्रह्मपथा
त्स्वस्वस्थाने नियोजयेत् ततो देवीरूपमात्मानं विभाव्य हृदि जीवन्यासं कुर्यात्
दक्षहस्ते यथा आंह्रींक्रौंसः श्री दक्षिणायाः कालिकायाः प्राणा इह प्राणाः अ

४८
[illegible]

सुषुम्णाजीवइहस्थितः अमुष्यासर्वेंद्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणादीनीहाग
त्यसुखंचिरंतिष्ठंतुस्वाहा इतिजीवंन्यसेत् तदुक्तंतंत्रे संहारक्रमयोगेनपंच
तत्वंसमुद्धरेत् शोषदाहप्लवानुकृत्वावाय्वग्निसलिलाक्षरैः ततोन्यासंप्रकुर्वीत
फेत्कारीतंत्रसीरितम् अन्यत्रापि देवीरूपंततोध्यायेदात्मानंकमलेक्षणे त
तोबीजंप्रविन्यस्यपाशादित्र्यक्षरेणच प्राणमंत्रेणयुक्तेनततोमुष्याःपदंततः
प्राणइतिवदेत्पश्चादिहप्राणस्ततःपरम् अमुष्याजीवइहस्थितोमुष्याःपदंत
तः सर्वेंद्रियाण्यमुष्याश्चवाङ्मनोनयनानिच श्रोत्रघ्राणपदात्प्राणइहागत्य
सुखंचिरं तिष्ठंतुवह्निजायांतःप्राणमंत्रोयमीरितः प्रकारांतेनरंच ज्ञानार्णवे
विपरीतंप्राणमंत्रंविलिखेन्न्यासपूर्वकम् प्राणप्रतिष्ठामंत्रोयंसर्वकर्माणिसाध
येत् अस्यमंत्रांतेमुष्याजीवइतिबोद्धव्यं अमुष्याइत्यमुष्यास्थानेसाध्यदेव
तानामपदंषष्ठ्यंतंप्रयोक्तव्यं तदुक्तंनारायणीये अमुष्यपदंयद्रूपंयत्रपदे
षुदृश्यते साध्याभिधानंतद्रूपंतत्रस्थानेनियोजयेत् इतिमारीतंत्रेपि ॥
भूतशुद्धिंविधायेत्थंदेवीरूपेणचिंतयेत् प्रणवंपूर्वमुद्धृत्यत्रमितिचपदंततः

हूंफट्स्वाहामनुप्रोक्तःकायवाक्चित्तशोधने रक्तहूंफट्ततःस्वाहामंत्रस्तदात्मरक्ष
णे एवंभूतशुद्धिंकृत्वा ओंत्रांहूंफट्स्वाहा इतिमंत्रेणकायवाक्चित्तानिसंशो
ध्य रक्तहूंफट्स्वाहा अनेनहृदिहस्तंदत्वात्मरक्षांविधाय स्ववामेशक्तिंसंस्थाप्य
प्राणायामादिकंकुर्यात् तदुक्तंकुमारीकल्पे ततःषोडशवार्षिकींनारींमानीयमं
त्रवित् युवतींमदनोन्मत्तांसुवेशांचारुहासिनीम् सदारक्तेसाभिलाषांसिंदूरां
कितमस्तकाम् साधकश्चैवसपत्नींवामेसंस्थापयेद्बुधः तस्यास्तुभूतशुद्ध्या
दिकृत्वावैमातृकांन्यसेत् प्राणायामंततःकृत्वाकारयित्वायथाविधीति अ
थऋष्यादिन्यासंकुर्यात् यथा अस्यश्रीदक्षिणकालिकामंत्रस्य भैरवऋषिः
उष्णिक्छंदः श्रीदक्षिणकालिकादेवता क्रींबीजं हूंशक्तिः क्रींकीलकं ममचतु
र्वर्गसिद्ध्यर्थेविनियोगः इतिकृतांजलिः संकल्प्य पुष्पेणकायेनवाचामनसावा
न्यसेत् यथा भैरवऋषयेनमःशिरसि उष्णिक्छंदसेनमोमुखे श्रीदक्षिणका
लिकायैनमःहृदि क्रींबीजायनमोगुह्ये हूंशक्तयेनमःपादयोः क्रींकीलकाय
नमः सर्वांगेषु तदुक्तंकालीतंत्रे भैरवोस्याऋषिःप्रोक्तउष्णिक्छंदउदाहृतं

श्यामा
१३

देवता कालिका प्रोक्ता लज्जाबीजं तु बीजकम् । शक्तिश्च कूर्चबीजं स्याद् अनिरुद्धसरस्व
ती कवित्वार्थे प्रयोगः स्यादेवमृष्यादिकल्पना । कीलकं चाद्यबीजं तु क्रमेण विन्य
सेत्प्रिये । ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपंकजे । देवता हृदये चैव बीजं तु गुह्य
देशके । शक्तिं तु पादयोश्चैव सर्वांगे कीलकं न्यसेत् । अथ करन्यासांगन्यासौ कुर्याद्यथा
ॐ क्रां अंगुष्ठाभ्यां नमः । ॐ क्रीं तर्जनीभ्यां स्वाहा । ॐ क्रूं मध्यमाभ्यां वषट् । ॐ क्रैं अना
मिकाभ्यां हुं । ॐ क्रौं कनिष्ठाभ्यां वौषट् । ॐ क्रः करतलपृष्ठाभ्यां अस्त्राय फट् । इति कर
न्यासः । अथांगन्यासः । ॐ क्रां हृदयाय नमः । तर्जनीमध्यमानामिकाभिर्न्यसेत् । ॐ
क्रीं शिरसे स्वाहा । इति शिरसि तर्जनीमध्यमाभ्यां शिरसि । ॐ क्रूं शिखायै वषट् । इति शि
खायां मुष्टिबद्धांगुष्ठेन । ॐ क्रैं कवचाय हुं । इति कवचे हस्तद्वयांगुलीभिः । ॐ क्रौं नेत्रे
भ्यां वौषट् । इति । ॐ क्रः अस्त्राय फट् । इति तर्जनीमध्यमाभ्यां ऊर्ध्वोर्ध्वतालत्रयं दत्वा
दशदिग्बंधनं छोटिकाभिः कुर्यात् । इत्यंगन्यासः । तदुक्तं वीरतंत्रे । दीर्घषट्कलस
मायुक्तेन प्रणवाद्येन कल्पयेत् । विशेषो यथा कालीतंत्रे । हृदयाय नमः पूर्वं शिर
से वह्निवल्लभा । शिखायै वषडित्युक्तं कवचाय हुं इतीरितम् । नेत्रत्रयाय वौषट्

स्यादस्त्राय फट् प्रकीर्तितम् । स्वतंत्रे । प्रणवं चाद्यबीजं च षड्दीर्घस्वरभाजितम् ।
कुर्यात् षडंगविन्यासं मूलखंडत्रयेण वा । अत्र प्रकारः । मूलादिखंडसप्तबीजेन हृदय
द्वितीयखंडेन मायाद्येन शीर्षं तृतीयखंडेन नवबीजेन शिखां प्रणवाद्येन खंडत्रयेण पुनः
प्रथमखंडेन कवचं द्वितीयखंडेन नेत्रत्रयं तृतीयखंडेनास्त्रम् । एवं विधिना त्रिः
सप्तधा षडंगन्यासं मूलखंडत्रयेण द्विरावृत्त्या वा कुर्यात् । तदुक्तं भैरवतंत्रे । षडंगा
नि न्यसेन्मंत्री त्रिः सप्तधा यथाक्रमम् । अथ वर्णन्यासं कुर्याद्यथा । अं आं इं ईं उं ऊं
ऋं ॠं लृं ॡं नमः हृदये न्यसेत् । एं ऐं ओं औं अं अः कं खं गं घं ङं नमः दक्षभुजे । चं छं
जं झं ञं टं ठं डं ढं नमः वामभुजे । णं तं थं दं धं नं पं फं बं भं नमः दक्षजंघायां । ततो मा
तृकान्यासं कृत्वा श्रीकंठादिन्यासं कुर्यात् । तदुक्तं स्वतंत्रे । आदौ तु मातृका पुनः । दे
वता व्यंजनं बीजं शक्तयस्तु स्वरास्ततः । अव्यक्तं कीलकं ज्ञेयं न्यसेदुक्तक्रमेण तु । उक्त
क्रमेण सर्वांगं ऋष्यादिक्रमेणान्यथैः । अकारेण समं कादिवर्गांश्च प्रथमं मतम् । तै
श्च बिंदुसंयुक्तैर्लिखेत्सौरस्वरैरिह । आकारं च ततो धार्यं अंगुष्ठाभ्यां नमस्तथा
प्रणवं मातृकामंत्रमंगुष्ठद्वयतो न्यसेत् । ह्रस्वेकारस्य वर्गेण दीर्घेकारांतगेन

च तर्जनीयुगलं देवि विन्यसेत्स्वाहांतगेन तु उकारेणाद्यकारेण ऊकारांतेन सुंदरि
मध्यमायुगलं सम्यग्वषडंतेन विन्यसेत् एकारादिनवर्गेण ऐकारांतेन हुं मनुः
न्यसेदनामिकायुग्ममिति यंत्र तत्र भैरवि ओंकाराद्यपवर्गेण औकारांतेन शोधयेत्
वौषडंतं कनिष्ठाभ्यां विन्यसेत्कार्यसिद्धये अंकारादियवर्गेण शवर्गेन तु सुव्रते अ
ःफडंतेन पाणिभ्यां विन्यसेत्करपृष्ठयोः ह्रैं नमस्त्रं समुच्चार्य करन्यासे नियोजयेत्
तथा मातृकान्यासे षडंगं मातृकायास्तु साधकः कारयेत्ततः स्वराणां क्लीबहीना
नां सविसर्गानां क्रमेण तु युग्मयुग्मांतरालेन तु पंचवर्गान् सबिंदुकम् निक्षिपेद्यादिवर्गा
न् शेषवर्गान् बालके हृदयं च शिरो देवि शिखा कवचं ततः नेत्रमस्त्रं न्यसेत् ङें
तेन मः स्वाहा क्रमेण तु वषट् हुं वौषट् अस्त्रं च फडंतं योजयेत्प्रिये षडंगोयं मा
तृकायाः सर्वपापहरः स्मृतः षडंगं मातृकायास्तु साधकः कारयेत्ततः स्वराणां क्ली
बहीनानामिति ऋ ॠ ऌ ॡ रहितानामित्यर्थः एवं विधिना मातृकाषडंगं कृत्वा
तां ध्यायेत् यथा ध्यायेत्तां भावरूपां सकललिपिमयीं लोचनांभोजयुग्मां मुक्ता
लंकारस्फुरत्पाणिशिरस्सु जटारोपयुक्तां प्रसन्नाम् विद्यामुद्राक्षसूत्रं प्रभाभयमपि

दधतीं शुभ्ररूपां त्रिनेत्रीयां वा दृष्वी पंचवक्त्रां चतुर्मरत्नमितां चिंतयेत्साधकेंद्रः एवं ध्या
त्वा अकारादि क्षकारांतं न्यसेद्यथा ललाटमुखवृत्तनेत्रश्रुतिघ्राणेषु गंडयोः ओष्ठ
दंतोत्तमांगमूर्द्धास्यदोःपत्संधिषु अग्रकेषु च पार्श्वतो पृष्ठतो नाभौ हृदये जठरांसके ककु
द्यंसे च हृदादि विहृत्पादयुगेन ततः जठराननयोर्न्यसेन्मातृकां तां यथाक्रमात्
ततः प्रयोगः अं नमो ललाटे आं नमो मुखे इं नमो दक्षनेत्रे ईं नमो वामे उं न
मो दक्षकर्णे ऊं नमो वामे ऋं नमो दक्षनासापुटे ॠं नमो वामे ऌं ॡं दक्षवामघ्रा
णयोः एं ऐं ऊर्ध्वाधरोष्ठयोः ओं औं ऊर्ध्वाधोदंतपंक्त्योः अं मस्तके अः मुखे कं
खं गं घं ङं दक्षबाहुमूलसंध्यग्रेषु चं छं जं झं ञं वामबाहुमूलादिषु टं ठं डं ढं णं द
क्षजंघामूलाग्रादिषु तं थं दं धं नं वामजंघामूलादिषु पं फं दक्षवामपार्श्वयोः
बं पृष्ठे भं नाभौ मं जठरे यं त्वगात्मने नमः हृदि रं असृगात्मने नमः दक्षांसे लं
मांसात्मने नमः ककुदि वं मेदात्मने नमः वामांसे शं अस्थ्यात्मने नमः दक्षिणबा
हौ षं मज्जात्मने नमः वामबाहौ सं शुक्रात्मने नमो हृदादिदक्षपादे हं जीवात्म
ने नमः हृदादिवामपादे ळं प्राणात्मने नमः पादादि हृदि क्षं परमात्मने नमः हृ
दयाद्धिशिरसि इति व्यापकं न्यसेत्

पंचाशद्वर्णन्यासः क्रमेणैवं प्रदर्शितः ॐ आद्यंतेन मोंतो वा सबिंदु बिंदुवर्जितः
मायालक्ष्मीबीजपूर्वो न्यस्तव्यः प्रोच्यते बुधैः अथ मातृकान्यासमुद्रा यथा ललाटे
नामिकामध्ये विन्यसेन्मुखवृत्तके तर्जनीमध्यमानामा अंगुष्ठानामे च नेत्रयोः अंगु
ष्ठं कर्णयोर्न्यसेन्नासिकाद्वयोः कनिष्ठांगुष्ठकौ नसोः मध्यास्त्रिस्रो गंडयोश्च मध्यमामोष्ठयोर्न्यसेत्
अनामां दंतयोर्न्यस्य मध्यमांगुष्ठमांगके मुखे नामामध्यमौ च हस्तपादेषु पार्श्वयोः
कनिष्ठानामिकामध्यास्ता लृष्ठे च विन्यसेत् हृदये वतलं सर्वं मंसयोश्च ककुदस्थ
ले हृत्पूर्वं हस्तपान्हृदि हस्तलेषु तलमेव च एतास्तु मातृकामुद्राः क्रमेण परिकी
र्तिताः अग्न्यान्याविन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः अथ श्रीकंठादिन्यासो यथा
विन्यसेन्मातृकास्थाने श्रीकंठाद्यायथाक्रमम् पूर्णोदर्यादिभिः सार्धं मातृकार्णा समन्वि
तम् श्रीकंठानंत सूक्ष्माश्च त्रिमूर्तिरमरेश्वरः अर्घीशो भारभूतेश स्तिथीशः स्था
णुको हरः झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः अक्रूरश्च महासेनः षोडशास्व
रशक्तयः पश्चात्क्रोधेश चंडीश पंचांतक शिवोत्तमा तथैकरुद्रकूर्मैकनेत्राख्य च
तुराननः अजेश शर्व सोमेशास्तथा लांगलिदारुकौ अर्धनारीश्वराख्यो मा कांत
श्चाषाढदंडिनौ अत्रिमीन मेषाख्या लोहितश्च शिखी तथा छगलांडद्विरं

डेशौ समहाकालवालिनौ भुजंगेश पिनाकेश खड्गेशा रव्यबकेश्वरः श्वेतश्च भृगीश
लकुलिशिवाः संवर्तकस्तथा एते रुद्राः स्मरारक्ता धृतशूलकपालकाः पूर्णो
दरी स्याद्विरजा शाल्मली नंदनं ततः परम् लोलाक्षी वर्तुलाक्षी च दीर्घघोणा समीरि
ता स्याद्दीर्घमुखी गोमुखी च दीर्घजिह्वास्तथैव च कुंडोदरोर्ध्वकेशी च तथा विकृ
तमुख्यपि ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी तथा सुश्रीमुखी च विद्या
ख्या होताः स्युः स्वरशक्तयः महाकाली सरस्वत्यौ सर्वसिद्धिस्तथैव च गौरी त्रैलो
क्यविद्यास्यान्मंत्रशक्तिः ततः परम् आत्मशक्तिर्भूतमाता तथा लंबोदरी मता
द्राविणी नागिनी स्युः खेचरी चैव मंजरी रूपिणी वीरिणी पश्चात्काकोदर्यपि
पूतना स्याद्भद्रकाली योगिन्यौ शंखिनी गर्जिनी तथा सकालरात्रिः कुब्जिन्यौ क
पर्दिन्यपि वज्रिणी ज्ञेया च सुमुखी चर्ये रेवती माधवी ततः वारुणी वायवी प्रो
क्ता पश्चाद्रक्षोविदारिणी ततश्च सहजा लक्ष्मी व्यापिनी मायया द्विता एता
रुद्रांकपीठस्थाः सिंदूरारुणविग्रहाः रक्तोत्पलकपालाभ्यां अलंकृतकरां
बुजाः अत्र प्रयोगः ॐ ह्रीं श्रीं नमः शिवाय अं श्रीकंठपूर्णोदरी

श्रुपमा
२६

श्रीपा नमो ललाटे ऋं ऋनंतविरजा श्रीपा नमो मुखवृत्ते ॠं लृ दक्षशाल्मली श्रीपा नमः
सव्यनेत्रे ईं विश्वगर्भ लोलाक्षी नमः वामनेत्रे ॐ ऋ मशीशवर्तुलाक्षी नमः सव्यक
र्णे ॐ अवीशदीर्घघोणा श्रीपा नमः वामकर्णे ॐ भारभूतिसुदीर्घमुखी श्रीपा न
मः सव्यनासापुटे ॐ तिथीशगोमुखी श्रीपा नमः वामनासापुटे ॐ स्थाणुकदी
र्घजिह्वा श्रीपा नमः सव्यकपोले ॐ हरकुंडोदरी श्रीपा नमः वामकपोले ॐ झिं
शर्ध्वकेशी श्रीपा नमः ऊर्ध्वोष्ठे ॐ भौतिकविकृतमुखी श्रीपा अधरोष्ठे ॐ सद्योजा
तज्वालामुखी श्रीपा नमः ऊर्ध्वदंतपंक्तौ ॐ अनुग्रहेश्वर उल्कामुखी श्रीपा अ
धोदंतपंक्तौ ॐ अक्रूरसुश्रीमुखी श्रीपा नमो ललाटे अः महासेनविद्यामुखी श्रीपा
नमः आस्ये कं क्रोधीशमहाली श्रीपा नमः दक्षबाहुमूले खं चंडीशसरस्वती श्रीपा नमः
दक्षकूर्परे गं पंचांतकसर्वसिद्धि श्रीपा नमः दक्षमणिबंधे घं शिवोत्तमगौरी श्रीपा
नमः दक्षांगुलिमूले ङं एकरुद्रत्रैलोक्यविद्या श्रीपा नमः दक्षांगुल्यग्रे चं कूर्ममंत्र
शक्ति श्रीपा नमः वामबाहुमूले छं एकनेत्र आत्मशक्ति श्रीपा नमः वामकूर्परे जं च
तुराननभूतमातृ श्रीपा नमः वाममणिबंधे झं अजेशलंबोदरी श्रीपा नमः वाम

ांगुलिमूले ञं शर्मेशद्राविणी श्रीपा नमः वामांगुल्यग्रे टं सोमेशनागिनी श्रीपा नमः
सव्योरुमूले ठं लांगलिखेचरी श्रीपा नमः सव्यजानुनि डं दारुकमंजरी श्रीपा नमः दक्ष
गुल्फे ढं अर्धनारीश्वररूपिणी श्रीपा नमः दक्षपादांगुलिमूले णं उमाकांतवीरिणी
श्रीपा नमः सव्यपादांगुल्यग्रे तं आषाढिकाकोदरी श्रीपा नमः वामोरुमूले थं दंडिपो
तना श्रीपा नमः वामजानुनि दं अत्रिभद्रकाली श्रीपा नमः वामगुल्फे धं मीनयोगिनी
श्रीपा नमः वामपादांगुलिमूले नं मेषशंखिनी श्रीपा नमः वामपादांगुल्यग्रे पं लोहित
गर्जिनी श्रीपा नमः सव्यपार्श्वे फं शिखिकालरात्रि श्रीपा नमः वामपार्श्वे बं छगलांडकुंडि
नी श्रीपा नमः सव्यपृष्ठे भं द्विरंडकपर्दिनी श्रीपा नमः वामपृष्ठे मं महाकालवज्रिणी
श्रीपा नमः नाभौ यं वालिजया श्रीपा नमः हृदि रं भुजंगेशसुमुखी श्रीपा नमः सव्यांसे लं
पिनाकेशरेवती श्रीपा नमः वामांसे वं खड्गीशमाधवी श्रीपा नमः ककुदि शं बककवारुणी श्रीपा
नमः हृदादि षं श्वेतवायवी श्रीपा नमः त्वगादिसप्तधातुषु सं भृग्वीशरक्षोवधारिणी श्रीपा
नमः हृदादिपादयोः हं लकुलिसहजालक्ष्मी श्रीपा नमः पादादिहृदये। ळं शिवव्यापि
णी श्रीपा हृदादिशिरसि क्षं संवर्तकमाया श्रीपा नमः परमात्मनि हृदयादिमुखे २

श्यामा
१७

अथषोढान्यासः केवलंमातृकांसत्वामातृकांतारसंपुटाम् मातृ
कांपुटितंतारं न्यसेत्साधकसत्तमः मायाबीजंपुटितंतु मातृकांपुटितांचतत् का
मेनपुटितांदेवीशक्तिंतत्पुटितांन्यसेत् क्लींह्रंह्रूंचपुनर्ह्रींसाकं क्रंत्लूंत्लूंचसर्वव
त् मूलेनपुटितांदेवीं तत्पुटं मूलमेवच अनुलोमविलोमेन द्वाभ्यांमंत्रयथाविधिः
मूलेनाष्टोत्तरशतं व्यापकत्वेनविन्यसेत् ॐअंॐ एवंमातृकापुटितं श्रींअंश्रीं एवं
मातृकापुटितं एवंकामपुटितं शक्तिंक्लींह्रंह्रूं क्रंक्रंत्लूंत्लूं पूर्ववन्मंत्रपुटितां
अनुलोमविलोमतः केवलंमंत्रंमातृकास्थानेन्यस्य अष्टोत्तरशतेनव्यापकंकुर्यात्
केवलमातृका ॐअंअं अंॐअं श्रींअंश्रीं अंश्रींअं क्लींअंक्लीं अंक्लींअं ह्रीं
अंह्रीं अंह्रींअं मंत्रंअंमंत्रं हंमंत्रंहं अन्यादर्शेतु ह्रींपुटिताशक्तिं ह्रांह्रंह्रूं क्रं
क्रंक्लींपूर्ववत् मंत्रपुटितांतत्पुटितं मंत्रमंत्रमित्यादिलिखितमस्ति दुर्ज्ञेयं
नदुर्गीयात्रंगषोढान्यासवर्जिता तारायाकालिकायाश्च सत्यमुक्त्याश्रुततःपरा हन्ते
ऽन्त्यासवर्णेतु सर्वपापंप्रणश्यति विषापमृत्युहरणे ग्रहरोगादिनाशनं
दुष्टसत्वाविनश्यंति शत्रुवीर्याणिभिन्नतां कवित्वलहरीतस्यद्वारागारसपरंप

रात्मोत्कृत्वा अथषडंगन्यासंकुर्यात् ईश्वमातृहृदयोयंहृदय
स्याद्वियात्मकः क्रियतेतत्परत्वेन हृन्मंत्रेणततःपरम् सर्वज्ञादिगुणोपेतं संवि
द्रूपेपरात्मनि क्रियतेसुधियाहारः शिरोमंत्रेणदैशिकः हृक्तिरोच्चपविद्धाया
मनसाभावनाद्दृढा क्रियतेनिजदेहस्यशिखामंत्रेणदैशिकः मंत्रात्मकस्यदेह
स्यमंत्रध्यानेनतेजसा सर्वतोवर्ममंत्रेणक्रियतेन्याससंहृतिः यद्दातिपरंज्ञा
नेसंविद्रूपेपरात्मनि हृदयादित्रसंमेतैः स्यादेतन्मंत्रसंगतम् अध्यात्मिकादि
त्रयंयत्साधकस्यविनाशयेत् अविद्ययातंत्रंयत्परंधामसमीरितम् इतिषडंगवि
धायध्यानंकुर्यात् शक्तिहृदयपुटांतस्थंमलवत्हृदयसंस्थितं ज्योतिस्तत्त्वमयंध्या
येत्कुलात्कुलनियोजनात् अथवा शृंगाटहृदयमध्यस्थशक्तिहृदयपुटीकृतं
सत्यत्वपरमंध्येयंध्यानंतत्कुलयोगिनां अन्यच्च किरणस्थितमध्यस्थंचंद्रमा
स्वरमध्यगम् महाशून्येलयेसेव्याश्रोणीक्षिप्रनियोगिराट् महाशून्यर्डजितस
र्वोपाधिविनिर्मुक्तमौनभावविरहाक्षूणी एवमवजीत्यर्थः अथवा निरलंबेपदे
शून्येयत्रेत्तउपलायते तद्धर्ममध्यसेविन्नित्यंध्यानमेतद्धियोगिनां तद्धर्ममित्य

श्यामा
१९

र्थः करणमित्यर्थः इति ध्यात्वा अर्चयेद्विषयैः पुष्पैः तत्क्षणात्तन्मयो भवेत् त्या
सत्तन्मयता बुद्धिः सोहंभावेन चिंतयेत् विषयपुष्पाणि यथा अमायमनहंका
रमरागममदं तथा अमोहकमदंभं च अद्वेषक्षोभकौ ततः अमात्सर्यमलोभं
च दश पुष्पं विदुर्बुधः अहिंसा परमं पुष्पं पुष्पमिंद्रियनिग्रहः दयापुष्पं ज्ञानपु
ष्पं क्षमापुष्पं च पंचमम् इत्यष्टसमभिः पुष्पैरर्चयेत्परदेवतां इति पूजनं माला
पंचाशिकाप्रोतसूत्रपंक्तिशिवात्मकम् यथितात्मकं इति शक्तिमालांतेनेन संस्थि
तिः एवंविधिना वर्णमालामुपलभ्य तं समेरुं च कृत्वा अकारादिक्षकारांतं हका
रादिश्रीकंठपर्यंतं स्थूलं संज्ञप्य परतेजसि तद्रूपं समर्पयेत् अस्यादर्शेत् अकारा
दिक्षकारांतं लकारादिश्रीकंठपर्यंतं स्थूलं सपरतेजसि तद्रूपं समर्पयेत् अथ हो
मः आस्थूलपरिच्छिन्नं विभाव्य आत्मीनरात्मज्ञानात्मपरमात्मस्वरूपं चतुरस्रं कुं
डं आनंदमेखलायुतं नाभौ विभाव्य तन्मध्ये ज्ञानाग्नौ त्रुटयादियथा स्थूलाग्नौ ना
भिचैतन्यकुहविषामनसास्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा
अनेन प्रथमाहुतिं दद्यात् ततोस्थूलाग्नौ धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा
स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा अनेन द्वितीयाहुतिं

दद्यात् ततोस्थूलाग्नौ तेजसि चिरंतरकिरिंधनमेधमाने मायां धकारपरिवंथिनि सं
विद्योकस्रुचा चिदग्नौ तमरीचिविकासभूमौ विश्वं जुहोमि वसुधादि शिवावसानम्
इतिं तृतीयं सनंदत्वा साक्षात्तन्मयो भवेत् ततः पापपुण्यातिजीवन्मुक्तो भवेद्ध्रुवं
इति श्री[illegible] परमहंसपरिव्राजक[illegible] नाम [illegible]तीयः परिच्छेदः
अथ साधको युवतीवेषं कृत्वा युवतीमेवं च कारयित्वा पीठन्यासं कुर्यात् ततः श्रृ
[illegible] ततः स्त्रीवेषधारी स्यात्त्रिपुंड्रांकितमस्तकः श्रृंगारोज्ज्वलवेषपाप्तो
स्थूलाक्षरिजाननः एवं वेषादिकं सर्वं वनितामपि कारयेत् पीठन्यासं ततः पश्चा
दाधारशक्तिपूर्वकम् प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च सुधांबुधिं मणिद्वीपं
चिंतामणिगृहं ततः श्मशानं पारिजातं च तन्मध्ये रत्नवेदिकाः तस्योपरि मणेः पी
ठं न्यसेत्साधकपुंगवः चतुर्दिक्षु मुनीन्द्रैव वा शवांश्च नरमुंडकान् अधर्मादींश्चै
व धर्मादींश्च ... चतुष्टये हृदि शेषं तथा पद्मे सूर्यसोमं महेश्वरि वैश्वानरं तथा
सत्त्वं रजस्तथैव तमस्तथा आत्मानं चैव विन्यस्य प्राक्तिंहत्पद्मके न्यसेत् इच्छा ज्ञाना
क्रिया चैव कामदा कामदायिनी रतीप्रीति प्रिया नंदा कालिकायां मनोन्मनी

श्यामा
२०

वाग्भवं प्रथमं प्रोक्तं परार्धेन तदन्तरम् अपरार्धे विद्रूपार्धे हसौः पदं ततः परम्
सदाशिवमहाप्रेतइंतं पद्मासनं ततः नमउक्तत्र मंत्रोयं पीठन्यासउदाहृतः
एवं देहमये पीठे चिंतयेदिष्टदेवताम् अथादौ कामकलारूपमात्मानं विभाव्य
मूलाधारात्कुंडलिनीं परमशिवांतं ध्यात्वा चंद्रामृतेन संप्लाव्य कारकच्छपिकया
पुष्पं गृहीत्वा सुषुम्णा वाह्यहृदयाष्टदलपद्मे देवीं ध्यायेत् तदुक्तं स्वतंत्रे ततः
कामकलाध्यानादावाद्यकालिकां पराम् हस्ताभ्यां मुद्रया पुष्पं यंत्रमध्ये नि
धापयेत् अथ कामकला यथा तदुक्तं भावचूडामणौ मुखबिंदुवदाकारं तद
धः कुचयुग्मकम् सर्वविद्यामूलतापूर्णां सर्ववाक्सिद्धिप्रदम् सर्वार्थसाधकं देवि
सर्वरंजनकारकम् तदधः सपरार्धं च चिंतयेत्तदधोमुखम् सर्वभूतादिभूतं
तत्सर्वदेवनमस्कृतम् सर्वाह्लादनसंपूर्णां सर्वरंजनकारकम् सर्वार्थसाधकं
देवि सर्ववर्णप्रवर्तकम् एतत्कामकलारूपं गोप्यं साधकसत्तमैः श्रीक्रमे
यासामपुमतीनाम्नी यासा मोहनकारिणी बाह्याभ्यंतरभेदेन चिंतनीया च तां
शृणु त्रैलोक्यमेकरूपेण आत्मानमेकरूपिणी एकां प्रथमतिरूपिणां देवी

तां वर्णरूपिणीम् चिंतयेत्सुंदरीं देवीं सर्वव्यापककारिणीम् ईकारश्चात्र मंत्रस्यत्र
वयवचतुष्टयम् बिंदुपत्रस्य देवेशि प्रथमं वक्त्रकं न्यसेत् बिंदुद्वयं स्तनद्वंद्वं
हृदि स्थाने नियोजयेत् अकारार्धकलां सूक्ष्मां योनिमध्ये विचिंतयेत् तथा का
मकलारूपं मदनांकुरगोचरम् उद्यदादित्यसंकाशां सिंदूराभां स्तनद्वयं
बिंदुसंकल्पवक्त्रं तु स्फुरद्दीपशिखाप्रिये आधारब्रह्मरंध्रांतं सूत्रमार्गेण भा
वयेत् कामो बिंदुरहं देवि तत्रस्था परमेश्वरी शिवशक्तिमयं देवि तदधः स्ता
नौ च द्वयम् तदधः सपरार्धं तु चिद्रूपा परमा कला सापि कुंडलिनीशक्तिः
कामकलास्वरूपिणी सा यथा वर्णगच्छंती भित्त्वा ग्रंथिचतुर्दश प्रविश्य पर
मार्गं तु सूक्ष्माकारस्वरूपिणी सा च त्रिविधा सृष्टिब्रह्मविष्णुस्वरूपिणी संचिं
त्य साधको श्रेष्ठस्त्रैलोक्यं वशमानयेत् एतत्ते कथितं देवि कामकलास्तुति
श्चितम् गोप्यं च प्रयत्नेन यदीच्छेदात्मनो हितम् अथ योनिमुद्रा यथा
तदुक्तं कालिकाकुलसर्वस्वे वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठया तथा
दक्षिणतर्जन्या वामांगुष्ठेन योजयेत् तथा दुर्गं दक्षिणं गुष्ठं वामस्य मध्य

२१
श्यामा

कृपामा
२२

मादिकाः अंगुलीयामवेत्पिष्टे दक्षिणस्य करस्य च वामेन पितृतीर्थेन मध्य
मानामिकान्तया अधोमुखेन ततः कुर्याद्दक्षिणस्य करस्य च कूर्मं दृष्टसमं
कुर्याद्दक्षिणस्य करस्य च एवंविधः सर्वसिद्धिं ददाति पाणिकच्छपः कुर्यात्त्रि
हृदयासन्ने तु निमील्य नयनद्वयम् समं कायशिरोग्रीवं कृत्वा स्थिरतपो बुधः
ध्यानं संभावयेन्मंत्री सर्वपापप्रणाशनम् [illegible] ओं देव्या ध्यानं प्रवक्ष्या
मि सर्वदेवोपसेवितम् ओं अंजनाद्रिनिभां देवीं करालवदनां शिवां मुंड
मालावलीकीर्णां मुक्तकेशीं स्मिताननां महाकालहृदंभोजस्थितां पीनपयो
धराम् विपरीतरतासक्तां घोरदंष्ट्रां कपालिनीम् नागयज्ञोपवीतांगीं चंद्रार्ध
कृतशेखराम् सर्वालंकारयुक्तां मुक्तामणिविभूषितां मृतहस्तसहस्रैस्तु
बद्धकांचीदिगंशुकाम् शिवाकोटिसहस्रैस्तु योगिनीभिः विराजितां रक्तपू
र्णमुखांभोजां मद्यपानप्रमत्तिकां वह्न्यर्कशशिनेत्रां च रक्तविस्फुरिताननाम्
विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम् कंठावसक्तमुंडालीगलद्रुधिरच
र्चितां श्मशानालयमध्यस्थां ब्रह्मकेशववंदितां सद्यः कृत्तशिरः खड्गवराभी

तिवरांबुजाम् अत्र वामोर्ध्वहस्तेन पाणिनाधःशिरः अभयं दक्षहस्तोर्ध्वेनाधो
वरमित्यपि [illegible] ऊर्ध्ववामेन पाणिना करयुग्मलतलेच्छिन्नमुंडं
ततोधः सव्येभीतिं वरं च त्रितगदद्धहरे दक्षिणे कालिकेति अमेनक्रमवर्णितवम
नुविमवं भावयेत्तेन देवतेषामसौ करस्थः प्रकटितवदनेसिद्धयः स्युः ध्वजाकस्य अथ
विरूपाक्षकृतध्यानक्रमेण ध्यायेत् तद्यथा ओं भिन्नांजनचयप्रख्यां प्रमीतशवसं
स्थितां गलच्छोणितधाराभिः स्मेराननसरोरुहाम् पीनोन्नतकुचद्वंद्वां पीनोन्नतनि
तंबिनीम् दक्षिणं मुक्तकेशां गीर्दिगंबरां विनोदिनीं सदाशिवशवाविष्टां स्मराननंदो
परिस्थितां मुखसांद्रस्मितामोदमोदिनीं मदविह्वलां आरक्तमुखनेत्राभियोगिनी
भिर्विराजितां शवहृदयहृतोत्तंसां सिंदूरतिलकोज्ज्वलां पंचाशन्मुंडघटितमणिहारं
कशोभितां नानामणिविशेषाढ्यां नानालंकारभूषितां शवास्थिकृतकेयूरशंखदक्षि
णमंडितां शववक्षःस्थलारूढां लेलिहानां शवं क्वथितम् शवमांसकृतग्रासां साट्ट
हासां मुहुर्मुहुः खड्गमुंडधरां वामे सव्येभयवरप्रदाम् दंतुरां च महाघोरां चंडना
दातिभीषणाम् शिवाभिः घोररूपाभिः वेष्टितां भयदर्शिनीं मासैः मासैः स्वमतो

श्यामा
२२

जल्पंतीं घोररवैः स्वनैः हूं हूं किं कुर्व किं कुर्व यदिदानीमिति प्रभाषिणीम् अथापरध्यानमा
ह भैरवतंत्रे ॐ करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् दक्षिणां कालिकां दिव्यां
मुंडमालाविभूषितां सद्यश्छिन्नशिरःखड्ग वामोर्ध्वद्वयकरांबुजां महामेघप्रभां श्या
मां तथैव च दिगंबराम् कंठावसक्तमुंडालीगलद्रुधिरचर्चितां कर्णावतंसतानी
तशवयुग्मभयानकाम् घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् शवरूपम
हादेवहृदयोपरिसंस्थितां शिवाभिः घोररावाभिः चतुर्दिक्षु समन्वितां महाका
लेन च समं विपरीतरतातुराम् एतेषामन्यतमेन देवीं ध्यात्वा मानसोपचारैः सं
पूजयेत् तदुक्तं श्रीकुमारीकल्पे एतां तु मानसैर्भोगैर्गंधपुष्पैः सदीपकैः सुर
याबलियुक्तैश्च पूजयेद्वै यथाविधिः ततो वै मानसं त्वर्पं कुर्याद्धोमादिमेव च न
मस्कृत्य तथा स्तुत्वा बहिर्यागं समाचरेत् पूजयित्वा बहिः पूजां यंत्रपात्राणि य
था मुंडमालातंत्रे ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते शनिभौमदिने वापि
शरीरे मृतसंभवे स्वर्णे रौप्येथ लौहे वा प्रस्तरे चक्रमालिखेत् विविधं पदे ह्यास
नचक्रराजं समालिखेत् अथादिपुष्पवर्गलिप्तं स्वर्णादिपात्रे सुवर्णरता

ताम्रशलाकया बिल्वकंटकेन पुष्पेण वा मूलमंत्रेणाचार्यादौ बिंदुं ह्रीं च विलिख्य
ततः त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्त
मम् ततो वृत्तं समालिख्य लिखेदष्टदलं ततः वृत्तं विलिख्य विधिवल्लिखेद्भूपुर
मेककमिति कुमारीकल्पेपि आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ब
हिस्त्रिकोणमालिख्य षट्कोणं च बहिः लिखेत् मध्ये तु बैंदवं चक्रं बीजं माया
विभूषितम् षट्कोणं तु बहिर्वृत्तं ततोष्टदलकं लिखेत् बहिर्वृत्तेन संयुक्तं भू
पुरेकेन संयुतम् ज्ञात्वैवं मुक्तिमाप्नोति यंत्रमेतन्न संशयः एतत्तु विधिवत् ज्ञात्वा कुं
डगोलविलेपिते स्वयंभूकुसुमैर्युक्ते कुंकुमागुरुसेविते तंत्रेपि कुंकुमं विन्यस्त
देहस्त्वचक्रराजं लिखेत्सुधीः स्वर्णरजतताम्रपाषाणे वा अष्टधातुषु स्वयंभूकु
सुमं कुंडगोलो गोरोचनागुरुः काश्मीरं मृगनाभी च मद्यं च मलयोद्भवम् एषां
धः समाख्यातः सर्वदा चंडिकाप्रियः एतेन गंधयोगेन योनिचक्रं समालिखेत्
योनिद्वयं ततः कुर्यात्कोणषट्कं ततः प्रिये ततः चाष्टदलं भूमिचतुर्द्वारैः समन्वि
तं एतत्ते कथितं चक्रं मंत्रपुष्पांजलिं क्षिपेत् अत्र केचिद्वदंति षट्कोणमं

पुरमा
२३

तत्रमेवमुक्तं त्रिकोणमुसर्वमुक्तं स्वतंत्रतंत्रादिविरोधात् वीरतंत्रफेत्कारिणीतं
त्रकुलसद्भावादिविरोधाच्च तद्यथामुंडाविषये कालीकपालिनीकुल्लाकुरुकु
ल्लाविरोधिनीम् विप्रचित्तांमुसंपूज्य बहिः षट्कोणके बुधः उग्रामुग्रप्रभांदीप्तां
तथैवांतः त्रिकोणके नीलांघनांबलाकांच तथापरत्रिकोणके मात्रांमुद्रांमितांचै
व तथैवान्तस्त्रिकोणके इति तस्मात्षट्कोणंतद्गतमेव त्रिकोणयुक्तं षट्कोण
मष्टैनात्रशक्त्यात्मकं कोणषट्कमिति श्रीब्रह्मानंदपरमहंसगुरूणां पराम
र्शः तथाचनीलातंत्रे पंचशक्तिं समालिख्य अधोवक्त्रं सुलक्षणं सिद्धस्वरमते
अधोवक्त्रं पंचकोणमन्योन्यसमलंकृतम् एवं कृत्वा महाचक्रं स्थापयेत्सिंहविष्ट
रे फेत्कारिण्यां बहिरष्टदलं कुर्याच्चतुर्द्वारोपशोभितम् कालिका[illegible] त्रि
कोणं त्रिकोणं नवकोणपद्ममिति कालिकाकुलसद्भावेपि त्रिकोणं विन्यसेदादौ
पुनस्तत्रापि त्रिकोणकं नवकोणं पुनस्तत्र तन्मध्ये स्थापयेच्छिवां तत्रभवन्मते
पि शक्त्यात्मकमेव त्रिकोणं नतु शिवशक्त्यात्मकं वीरतंत्रकालीतंत्रस्वतंत्रा
दिविरोधात् तस्मादत्र षट्कोणशब्देन शक्त्यात्मकमेवोच्यते इतिभावः

नचनवकोणं तद्गतयुक्तस्त्रिकोणद्वयमपरः प्रकारः कथं स्यादिति चेत् तत्रैवं
षट्कोणवर्णं पूजयित्वा तथापरत्रिकोणं तथैवापरत्रिकोणं क्रमेण तत्रैव पूजयेत्
कुलसद्भावे कालीकपालिनीकुल्लाकुरुकुल्लाविरोधिनीम् विप्रचित्तां न्यसेच्चैवब
हिः षट्कोणके बुधः उग्रामुग्रप्रभांदीप्तां परंत्रिकोणके न्यसेत् नीलांघनांबला
कांच तथैव चापरत्रिके मात्रांमुद्रांमितांचैव तथापरत्रिकोणके इत्यादि तस्मा
देवं त्रिकोणंतद्गतं त्रिकोणद्वयमिति षट्कोणभावात् अथ त्रिकोणंतद्गतं नव
कोणं कथं स्यादिति चेत् तन्निर्वीजमेव यतो नवकोणशब्देन शक्त्यात्मकं नवको
णमुच्यते ननु शिवशक्त्यात्मकं वचनांतरदर्शनात् तद्यथाकालीक्रमे त्रिकोणं
विलिखेदादौ पुनस्तत्रापि त्रिकोणकं नवशक्तिं पुनर्देवि विंदुचक्रं समालिखेत्
अथ यंत्रभेदान्नानाविधमेव यंत्रं कथं न स्यादिति चेत् सत्यं विध्येककल्पना
नानाविधकल्पनमेव यंत्रं कथं न स्यादिति चेत् तस्मादुक्तमेव पंचदशको
णंशक्तमिति एवं गौडमिश्रप्रभृतीनामपि संमतमिति अथ स्वर्णादिसिंहास
ने पुरतो यंत्रं संस्थाप्य पुष्पांजलिना आवाह्य तत्र पीठन्यासं क्रमेण पूजयेत्

श्यामा
२४

ततो यथा ॐ आधारशक्त्यै नमः ॐ प्रकृत्यै नमः ॐ कूर्माय नमः ॐ अनंताय नमः
ॐ पृथिव्यै नमः ॐ सुधासमुद्राय ॐ मणिद्वीपाय ॐ चिंतामणिगृहाय ॐ श्म
शानाय ॐ पारिजाताय तन्मूले ॐ रत्नवेदिकायै नमः तस्योपरि ॐ मणिपीठा
य दिक्षु नानामुनिगणेभ्यो ॐ नानादेवेभ्यो बहुमांसास्थिमोदमानशिवाभ्यो न
मः चतुर्दिक्षु शवमुंडचिताङ्गारास्थिभ्यो नमः ॐ धर्माय नमः ज्ञानाय वैराग्या
य ऐश्वर्याय अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय शेषाय पद्माय
सूर्यमंडलाय सोममंडलाय वह्निमंडलाय सं सत्वाय रं रजसे तं तमसे आं
आत्मने अं अंतरात्मने ह्रीं ज्ञानात्मने पं परमात्मने नमः अष्टपत्रेषु ॐ इच्छा
यै नमः क्रियायै ज्ञानायै कामदायै कामदायिन्यै रत्यै रतिप्रियायै आनंदा
यै नमः कर्णिकायां ॐ मनोन्मन्यै नमः ऐं परायै अपरायै विरूपायै ह्सौः
ॐ सदाशिवमहाप्रेतपद्मासनाय नमः तथैव विधिना पीठपूजां कृत्वा कल
शस्थापनं कुर्यात् तल्लक्षणमाह तंत्रांतरे कलौ कलां गृहीत्वा वै देवानां विश्व
कर्मणा निर्मितोयं स्वबीर्ये स्तात्कलशस्तेन चोच्यते पादपद्माचार्यस्तु क

लास्य वक्त्रं उक्तिकलशः कलशमानमाह तदुक्तं तंत्रेव पंचाशदंगुलव्यास उत्से
धो द्वादशांगुलः कलशानां प्रमाणं तु मुखमष्टांगुलं मतम् सौवर्णं राजतं वापि
ताम्रजं वा यथोदितम् क्षालयेदस्त्रमंत्रेण कुंभं सम्यक् सुरेश्वरि अथ प्रयोगः
स्ववामे षट्कोणं तद्गतत्रिकोणं तद्गतत्रिकोणं बिंदु बाह्ये वृत्तं चतुरस्रं कृत्वा सामा
न्यार्घोदकेनाभ्युक्ष्य तत्राधारशक्तिभ्यो नमः इति पूजयेत् ततो नमः इत्याधारं प्र
क्षाल्य मंडलोपरि संस्थाप्य ॐ मं वह्निमंडलाय दशकलात्मने नमः इति संपू
ज्य फडिति कलशं प्रक्षाल्य कारणेन संपूर्य रक्तवस्त्रमाल्यादिना भूषयित्वा
देवीबुद्ध्या संस्थाप्य ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः इति संपूज्य तस्मिन्
ॐ चंद्रमंडलाय षोडशकलात्मने नमः इति पूजयेत् ततः फडिति संरक्ष्य हुं
इत्यवगुंठ्य मूलमंत्रेण संवीक्ष्य नमः इत्यभ्युक्षणं कृत्वा मूलेन गंधमानीय
पुष्पं दत्वा शापमोचनं कुर्यात् तदुक्तं तंत्रे तत्र स्वकारणं दिव्यं समानीय च
र्चयेत्तदा वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भूषितं वामभागे महेशानि मंडले
चतुरस्रके तत्र संस्थापयेद्भक्त्या देवीबुद्ध्या वरानने मंडले कलशोद्भवे

कृपमा
२५

वह्न्यर्कशशिमंडले स्ववामभागे षट्कोणं तन्मध्ये वृत्तरं ध्रुवकम् लिखित्वा तत्र
कुंभं वै सौवर्णं रत्नं तथा ताम्रं भूमिसंभवं वापि यद्वा लोहविवर्जितम् तत्राधारे
आधारे स्थापयेन्मंत्री सौवर्णं वाथ राजतम् कांस्यजं मृण्मयं वापि चित्रं मृण्मय
शालिनम् सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदं स्मृतं कांस्यं शांतिकरं चैव मृण्मयं
पुष्टिदं भवेत् अथ शापमोचनं यथा तदुक्तं कुमारीतंत्रे अन्यच्च शृणु देवेशि
यथा पानादिकर्मणि दोषो न जायते देवि तानि चैव मंत्राणि शृणु प्रिये एकमेव
परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्
सूर्यमंडलसंभूते वरुणालयसंभवे अमाबीजमये देवि शुक्रशापाद्विमुच्य
तां देवानां प्रणवो बीजं ब्रह्मानंदमयो यदि तेन सत्येन देवेशि ब्रह्महत्यां व्य
पोहतु एवं मंत्रत्रयेणैव अभिमंत्र्य सुरां पिबेत् प्रदद्यात्कालिकायै च ततो
नैवेद्यभाग्भवेत् इति वारत्रयं देवि चोर्ध्वं जप्त्वा पठेत्सुधीः ततः वां वीं वूं वैं
वौं वः ब्रह्मशापमोचितायै सुरादेव्यै नमः इति वारत्रयं पठेत् इति ब्रह्मशा
पमोचनं ततः ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुरादेवि शुक्रशापं मोचय अमृतं

स्रावय स्रावय स्वाहा इति शुक्रशापमोचनं अथानंतरं ते हंसः शुचिषद्वसुरं
तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋ
तजा अद्रिजा ऋतम् इति वारत्रयं कुंभोपरि पठेत् ततो कुंभमध्ये आनंदभैरव
मानंदभैरवीं च ध्यायेद्यथा ॐ सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलम्
अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनम् अमृतार्णवमध्यस्थं सदा ब्रह्मोपरि
स्थितम् वृषारूढं नीलकंठं सर्वाभरणभूषितम् कपालखट्वांगधरं घंटाड
मरुवादिनम् पाशांकुशधरं देवं गदामुसलधारिणं खड्गखेटकपट्टीशमुद्ग
रशूलदंडकम् विचित्रखेटकं मुंडं वरदाभयपाणिकम् लोहितं देवदेवेशं
भावयेत्साधकोत्तमः एवं ध्यात्वा ह्स्ख्फ्रें अमलवयरऊं आनंदभैरवाय वौषट्
इति आनंदभैरवं ध्यायेत् आनंदभैरवीं ध्यायेद्यथा भावयेच्च सुरां देवीं चंद्रको
ट्युप्रतप्रभाम् हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनाम् अष्टादशभुजैर्यु
क्तां सर्वानंदकरोद्यताम् प्रहसंतीं विशालाक्षीं देवदेवस्य संमुखीम् एवं
ध्यात्वा सहक्षमलवरऊं सुरादेव्यै वौषट् इति आनंदभैरवीं संपूज्य

श्यामा
२६

कृष्णमध्ये शक्तिचक्रं विलिखेत् ततः त्रिपंचारादक्षिणावर्त्तेन अं २६ वं २६
थं २६ क्रमेण विलिख्य तन्मध्ये हूं वीं लिखेत् ततः शिवशक्त्योः समावेशाद्ध
न्मध्ये मूलं विचिंत्य धेनुमुद्रयामृतीकरणं कृत्वा पुनिवक्त्राणां बीजं मूलमं
त्रमष्टधा वटं कृत्वा पठेत् पुनिकृष्णमुद्रिः [illegible] ततः चावाह
येद्दृष्णमध्ये रक्ताभिमांग्निये आवाह्यादित्रिपंचारा च हलत्वं मध्यमं डितम् ह
वींतियोनिमुद्रयाशिवशक्त्योः समागमम् अमृतं चिंतयेद्दृष्णमष्टधा अमृते
नपेत् अष्टधा मूलमंत्रं चजपेद्दृत्वा घटं ततः दत्तनुकारणां देवि सुरसं चानि
(हृदनमृ)षेविनं आनंदवैनस्यनामस्तुरे त्रिभुवनत्रये अमृगंधः वेशावस्तुतेन
मंधेनकौलिकः स्थापयेत्परमां देवीकालिकां दक्षिणां शिवां ततः शंखं वीरपा
त्रं स्थापयेन्मध्यमागतः श्रीविद्योक्तविधानेन ततः स्थालां समारभेत् [illegible]
[illegible] रक्तचंदनबिल्वादियवाक्कुसुमसंयुतैः अर्घ्यं दत्त्वा महेशानि
सर्वकामार्थसिद्धये स्वरयावार्घ्यदानेन योगिनीनां भवेत्प्रियः महायोगीभ
वेद्देवि पीठपूजापालनैर्दलैः स्वयंभूकुसुमैर्दत्तैर्भवेत्पद्मकर्मभाजनम्

स्तथीतलजलैर्वा पिकस्तूरीकुसुमान्वितैः कुंडगोलोद्भवीजैर्वा सर्वसिद्धीश्वरो भवे
त् सामान्यार्घं ततः कृत्वा पद्यसाधको नमः तंडुलैर्मंडलं कृत्वा पात्राणि स्था
पयेद्यथ [illegible] ततो वीं कारयेन्मंत्री तथानार्यास्तु वेशया आघीद्दृष्णम
र्घपात्रे निक्षिप्य मूयततः सुधीः कुंडगोलोद्भवं द्रव्यं स्वयंभूकुसुमं तथा नाधमीवि
द्यते तत्र महामंत्रस्य साधने नार्यास्तस्या गलत्पुंड्रा भूतेनेन्द्रार्थः अथश्रीविद्योक्त
क्रमेणार्घपात्रस्थापनं तद्यथा आदौश्रीचक्रयोर्मध्ये हुंकारेण त्रिकोणषट्कोण
वृत्तचतुरस्रं विलिख्य चतुरस्रे पूर्णगिरिपीठायनमः उड्डीयानपीठायनमः का
मरूपपीठायनमः जालंधरपीठायनमः इति संपूज्य षट्कोणेषडंगंपूजयेत्
ततो मूलखंडत्रयेण त्रिकोणमदक्षोत्तरं संपूज्य मध्ये आधारशक्तीः पूजयेत् त्रिको
णगर्भे षट्कोणे भूमिगायेत्रिकोणसंस्थायमनमः इति सामान्यार्घ्यजलेनाभ्युक्ष्य वह्नेः
दशकलाः पूजयेत् तद्यथा ॐ यं धूम्रार्चिषेनमः रं ऊष्मायैनमः लं ज्वालिन्यै वं
ज्वालिन्यै शं विस्फुलिंगिन्यै षं सुश्रियै सं स्वरूपायै हं कपिलायै लं हव्यवहा
यै क्षं कव्यवहायै इति सर्वत्रनमोंतेन पूजयेत् वह्निमंडलाय दशकलात्मने

पूजामा
२१

नमः इतिप्रक्षालयेत् ततः षट्कोणेषडंगंसंपूज्य मध्येव्यापकमंत्रेणदेवींसंपूज्य
कपालादिपात्रं पादुकेति प्रवालत्रिपादिकोपरिसंस्थाप्य तत्रसूर्यमंडलंपूजयेद्य
था कंभं तपिन्यैनमः खंबं तापिन्यैनमः गंफं धूम्रायै घंपं मरीच्यै ङंनं ज्वालि
न्यैनमः चंधं रुच्यैनमः छंदं सुषुम्णायैनमः जंथं भोगदायैनमः झंतं विश्वायैनमः
ञंणं बोधिन्यैनमः टंढं धारिण्यैनमः ठंडं क्षमायैनमः इतितन्मंत्रेणपूजयेत्
ततः त्रिकोणवृत्तषट्कोणंपात्रमध्येसंलिख्यसमस्तव्यस्तमंत्रेणसंपूज्य वरुण
बीजंमूलमंत्रंविलोममात्रकांचपठन् घटस्यधारयाशुद्धेनत्रिकोणंसंपूर्य
(विलोममात्रकांचपठन्) जलेनभागमेकंपूरयेत् ततोदूर्वाक्षतरक्तपुष्पबिल्व
पत्राणिनानासुगंधद्रव्याणितत्रनिक्षिप्य तत्रसोममंडलंपूजयेद्यथा अंअमृ
तायैनमः आंआनंदायैनमः इंपूषायैनमः ईंतुष्ट्यैनमः उंपुष्ट्यैनमः ऊंरत्यै
ऋंधृत्यैनमः ॠंशशिन्यैनमः लृंचंद्रिकायैनमः लॄंकान्त्यैनमः एंज्योत्स्नायै
ऐंश्रियै ओंप्रीत्यै औंअंगदायै अःअमृतायैनमः इतितन्मंत्रेणसंपूज्य संसो
ममंडलायषोडशकलात्मनेनमः इतिपूजयेत् ततःसर्वतन्मंत्रकारणेनवि

लिख्यत्रिकोणरेखायां अं १६ कं १६ थं १६ इतित्रिःलिखेत् ततोमूलखंडत्रयेण
त्रिकोणंसंपूज्यषट्कोणेषडंगंचपूजयेत् ततोगंगेचेत्याद्यर्कमंडलात्तीर्थमावाह्य
आनंदभैरवंआनंदभैरवींचतत्तन्मंत्रेणसंपूज्य पूर्वादिक्रमेणपंचरत्नंपूजये
द्यथा गलंऊंगगनरत्नेभ्योनमः सलंऊंस्वर्गरत्नेभ्योनमः पलंऊंपातालरत्ने
भ्योनमः मलंऊंमर्त्यरत्नेभ्योनमः नलंऊंनागरत्नेभ्योनमः इतिपूजयेत् ततो
द्रव्येमध्येमांसमीनमुद्राखंडगोलादिकंचसंशोध्यनिक्षिपेत् तेषांशुद्धिर्यथा
तत्रमांसंत्रिविधं रुद्रयामले मांसंचत्रिविधंचैवजलखेचरभूचरम् गोमेरे
माजमहिषवराहाजमृगोद्भवम् मधुमांसादिकंप्रोक्तंदेवताप्रीतिकारकम् अ
भावेतदभुकल्प लवार्द्रकपिण्याकगोधूममाषपंचकम् लशुनंचमहेशानि
मांसप्रीतिविधौस्मृतम् ओंप्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठः
यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा इतिमांसंशोधयेत् ततोमी
नशुद्धिः मीनंचत्रिविधं रुद्रयामले मत्स्यंचत्रिविधंप्रोक्तंउत्तमाधममध्यमं
त्रिविधंचैवदेवेशिशालपाठीनरोहिताः पाठीनंकंटकैर्हीनंतैलाक्तंस्वादुसंयुतं

देव्याः प्रीतिकरं चैव मध्यमं नाम तत्त्वतुर्विधम् ॥ तल्लक्षणानि तानि सर्वाणि चाधमान्याहुः उ
त्तमाः ॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योः मो
क्षीयमामृतात् ॥ इति मीनमुद्रा ॥ अथ मुद्राशोधनं ॥ व्रीहीयं मंडलाकारं चंद्रबिंब
निभं शुभम् ॥ चारुरूपं मनोहारि शर्करायैः प्रपूरितं ॥ पूजाकाले देवतायाः मुद्रा सा
परिकीर्तिता ॥ व्रीहीयं धान्यादिकं यद्यद्भक्ष्यं प्रदर्शयेत् ॥ तेषां संज्ञा हि ता मुद्रा
महामुद्राप्रवर्धिनी ॥ अथैतन्मुद्रा ॥ ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः
दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं प
दम् ॥ इति मुद्राशोधनं ॥ ॐ विष्णुः योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंच
तु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ॥ गर्भं ते
अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ॐ ह्सौं क्लीं गं सः अमृते अमृतोद्भवे अमृतेश्वरि
अमृतवर्षिणि अमृतं स्रावय २ स्वाहा ॥ इति धेनुर्गोलोद्भवादि मुद्रा ॥ ततः सर्वं
द्रव्यं वस्तु धेनुमुद्रया अमृतीकृत्य तालत्रयदिग्बंधनं च कृत्वा तदुपरि स्थलं स्व
प्रधाल्पेन ॥ ऐं क्लीं सौः ब्रह्मांडखंडसंभूतमशेषरससंभृतं ॥ आपूरितं महापात्रं

पीयूषरसमावह ॥ अखंडैकरसानंदपाकरे परसुधात्मनि ॥ स्वच्छंदस्फुरणाम
त्र निधेहि कुलरूपिणि ॥ अकुलस्थामृताकारे सिद्धिज्ञानकरे परे ॥ अमृतत्वं निधे
हि अस्मिन् वस्तुनि क्लिन्नरूपिणि ॥ तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरूपिणि ॥ भूत्वा परा
मृताकारं मयि चित्स्फुरणं कुरु ॥ अनेन कारणामामंत्र्य ॥ तत्र देवीमावाह्य ताल
त्रयदिग्बंधनं च कृत्वा अवगुंठनमुद्रया अवगुंठ्य धेनुमुद्रया अमृतीकृत्य योनिमु
द्रां प्रदर्श्य ह्सौः नमः इति संपूज्य शंखमुद्रां प्रदर्श्य षडंगेन सकलीकृत्य मत्स्य
मुद्रया पात्रमाच्छाद्य मूलमंत्रं दशधा जप्त्वा देवीस्वरूपं पात्रं विभावयेत् ॥ पात्रं च
स्थापनमयपर्यंतं मलिलं न कार्यं ॥ अथावगुंठनमुद्रा यथा ॥
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुंठनमुद्रेयमभितो भ्रामिता
मता ॥ धेनुमुद्रा तु सुवीक्षा ॥ अथ योनिमुद्रा यथा ॥ मध्यमे
कुटिलाकारे तर्जन्युपरि संस्थिते ॥ अनामिके मध्यगते तथैव हि कनिष्ठिके ॥ स
र्वा एकत्र संयोज्या अंगुष्ठपरिपीडिता ॥ योनिमुद्रा समाख्याता त्रैलोक्योत्पत्तिमा
तृका ॥ वामांगुष्ठेन चांगुष्ठं नियोज्य सकलांगुली ॥ दक्षिणस्य करस्यैव वामां

२८
श्यामा

गुप्तेन संस्पृशेत् शंखमुद्रा समाख्याता मंत्रविद्भिः प्रदर्शिता देवमंगेषडंगं च स
कलीकरणं भवेत् दक्षपाणिपृष्ठदेशे वामपाणितलं क्षिपेत् ततो देव्या आज्ञां गृ
हीत्वा घटश्रीपात्रयोः मध्ये पात्राणि स्थापयेद्यथा घटसमीपे गुरुपात्रं त
तः शक्तिपात्रं बलिपात्रं स्वपात्रं पाद्यपात्रं अर्घ्यपात्रं आचमनीयपात्रं च क्र
मेण स्थापयेत् सामान्यार्घ्यपात्रं ततो मत्स्यमांसयुतकारणेन तत्त्वमुद्रया श्री
पात्रात्समुद्धृत्य आनंदभैरवं तर्पयामीति तन्मंत्रेण संतर्प्य ततः अमृतवानं
दनाथ गुरुपादुकां पूजयामीति त्रिः सहस्रारे संतर्पयेत् ततः श्रीपात्रामृतेन
देवीं सायुधां सवाहनां सपरिवारां हृदि संतर्पयेत् इति तत्त्वमुद्रया [illegible]
अंगुष्ठानामिकायोगाद्वामहस्तस्य पार्वति तर्पयेत्सायुधां देवीं कालिकां स
परिकरामृ ततः तत्त्वशुद्धिं कुर्यात् [illegible] ॐ प्राणापानव्या
नोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा १ ॐ पृ
थिव्यप्तेजोवाय्वाकाशानि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा
२ ॐ त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवचांसि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भू

यासं स्वाहा ३ ॐ पाणिपादपायूपस्थशब्दानि मे शुध्यंतां ज्योतिरहं विरजा विपा
प्मा भूयासं स्वाहा ४ ॐ मनोबुद्ध्यहंकारबुद्धिः मनःश्रोत्राणि मे शुध्यंतां ज्योति
रहं विरजा विपाप्मा भूयासं स्वाहा ५ ॐ स्पर्शरूपरसगंधाकाशानि मे शुध्यंतां
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ६ ॐ वायुतेजःसलिलभूम्यात्मा मे शु
ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ७ ततो मूलमंत्रेण सुपात्राण्ये
कीकारं कुर्यात् ततः श्रीपात्रामृतेनात्मानं पूजोपकरणानि चाभ्युक्ष्य त
स्मात्सर्वं ब्रह्ममयो भवेदिति ततः वक्त्रस्य स्वदक्षिणपश्चिमोत्तरे त्रिकोण
वृत्तं विलिख्य ॐ ह्रीं मंडलाय नमः इति मंडलं संपूज्य पूर्वे वं वटुकाय
नमः इति पाद्यादिभिः संपूज्य अर्धरात्रपूर्वं सलिलमांसमीनमुद्राः बलिमु
पसंहृत्य बलिपात्रस्य कारणेन वामांगुष्ठानामिकाभ्यां तु मुद्राछेदनेन एह्ये
हि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्ना
न्नाशय सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा एष बलिः वटुकाय नमः द
क्षे यां योगिनीभ्यो नमः इति योगिनीः सम्पूज्य तर्जनीमध्यमानामिकां

श्यामा
३०

पुष्पैर्बलिं दद्यात् ॐ ऊर्ध्वब्रह्माण्डतो वा दिविगगनतले भूतले निष्कले वा पाता
ले वा वने वा सलिलपवनयोर्यत्र कुत्र स्थितो वा क्षेत्रे पीठोपपीठादिषु च
कृतपदा धूपदीपादिकेन प्रीता देव्यास्सदा नः शुभबलिविधिना पान्तु वीरे
न्द्रवंद्याः यां योगिनीभ्यः स्वाहा पश्चिमे क्षां क्षेत्रपालाय नमः इत्यभ्यर्च्य
वामसुष्टिं कृत्वा तर्जनीं सरलां विधाय पुनर्बलिं दद्यादनेन क्षां क्षीं क्षूं क्षैं
क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण २ स्वाहा एष बलिः
क्षेत्रपालाय नमः उत्तरे गां गणेशमभ्यर्च्य दंडाकारांगुलीमध्ययुक्ताः कृ
त्वा पूर्ववद्दद्यात् बलिं दद्यादनेन गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वज
नं मे वशमानय बलिं गृह्ण २ स्वाहा एष बलिर्गणेशाय नमः अथ स्ववामे
मंडलं कृत्वा पूर्ववत्संपूज्य तत्र साधारबलिं संस्थाप्य मूलेनाभिमंत्र्य तत्र
धूपदीपादिना सर्वान्संपूज्य ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हुं फट्
स्वाहा एष बलिः सर्वभूतेभ्यो नमः इति तत्त्वमुद्रयोत्सृजेत् एवं पंच
बलिं कुर्यात् ततः पूर्ववत् षडंगं विधाय कालेमकलां ध्यात्वा तत्कुण्डाद्दिवा

कराह्रणाकुसुमाञ्जलिं गृहीत्वा मूलाधारात्कुंडलिनीं ब्रह्मपथा पर
मशिवपर्यंतं विश्राम्य हृदयाद्दलं समानीय मूलेन मूर्तिं कल्पयेत् मतांतरे
देवीं सुषुम्णामार्गेणानीय ब्रह्मरंध्रकम् वामनासापुटे कृत्वा नि
र्यांतं स्वाञ्जलिस्थितम् पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेत् वीरतंत्रे
पि ततः पूर्वोक्तरूपां तां ध्यायेच्च वह्निदक्षिणा योगिनीचक्रसहितां महाका
लसमन्वितां कालीतंत्रेऽपि ततो हृदयपद्मांतः स्फुरंतीं परमां कलां यंत्र
मध्ये समावाह्य पुष्पजालं प्रविन्यसेत् कुमारीकल्पेऽपि ततो हृदयपद्मांतः
स्फुरंतीं विद्युदाकृतिम् सुषुम्णावर्त्मनानीत्वा शिवस्थाने महेश्वरीम् ततो वै
हृदयात्सत्रे पुष्पांजलिं समानयेत् नासया वामया देवि वायुबीजेन मंत्रवित्
देवेशीं निजमंत्रेण बिंदावावाहयेत्सुधीः अथ पूर्वोक्तरूपां ध्यात्वा दीपांतर
मिव शिवे संयोज्य शिवशिवे संयोजिनिति वायुबीजेन वामनासापुटेन देवीं
स्वहृदयात्कुसुमाञ्जलिमानीय यंत्रमध्ये समावाहयेदनेन देवेशि भक्तिसु
लभे परिवारसमन्विते यावत्त्वां पूजयिष्यामि तावद्देवि इहावह इति यंत्र

३६

पूपामा
३२

मध्ये देवीं संस्थाप्य आवाहयेद्यथा श्रीमहाकालसहिते दक्षिणे कालिके
इहागच्छ २ इह तिष्ठ २ इह सन्निहिता भव २ इह सन्निरुद्धा भव २ मम
पूजां गृहाण २ इत्यावाह्य पूर्ववज्जीवन्यासं लेलिहानमुद्रया कुर्यात् विग्र
हेण चाहूत्वा हूं इत्यवगुंठ्य सकलीकरणं परमीकरणं च कृत्वा कोटिकामि
दीप्यादि ... विधायामृतीकुर्यात् अथावाहनमुद्रा तदुक्तं दक्षिणामूर्तिसं
हितायां ऊर्ध्वांजलिमधः कुर्यादियमावाहनी भवेत् इयं तु विपरीता स्थापन
दा वै स्थापनी भवेत् ऊर्ध्वांगुष्ठं मुष्टियुग्मं तदियं सन्निधापनी अंतरांगुष्ठमु
ष्टिभ्यां तदियं स्यान्निरोधिनी लेलिहानमुद्रा यथा तर्जनी मध्यमानामास
मं कुर्याद् अधोमुखस्तु अनामासा क्षिपेद्धृत्वा ऊर्ध्वं हत्वा कनिष्ठिकाम् लेली
हाना मुद्रेयं जीवन्यासे प्रकीर्तिता देवतावषडंगं च सकलीकरणं भवेत्
ततो योनिमुद्रां खड्गमुंडवराभयपरयोनीर्दर्शयित्वा प्रतिचक्रे रश्मिवृंदादेव
ताः आवाहयेत् तदुक्तं स्वतंत्रे देवीं ध्यात्वा समावाह्य योनिमुद्रां प्रदर्शयेत्
खड्गमुंडवराभीतिं परयोनिं च दर्शयेत् ततश्च प्रतिचक्रेषु देवीमावाहये

द्बुधीः अथ शंखमुद्रादि यथा कनिष्ठानामिकाबद्धांगुष्ठेनैव दक्षिणतः शेषां
गुलीस्तु प्रसार्य ते संपूर्णा खड्गमुद्रिका अंतरंगुष्ठमुष्टिं च कृत्वा वामकरस्य च मध्य
मां प्रादक्षिणस्य तथा लेखा प्रयत्नतः मध्यमेनाथ तर्जन्या मेयुष्ठाग्रामासतया
दक्षिणे योजयेत्पाणिं वामस्य चैतु साधकः दर्शयेद् दक्षिणे भागे मुंडमुद्रेयमुच्य
ते वरदाभयमुद्रा च वरदाभयवत् स्मृते तर्जन्यनामिके मध्ये कनिष्ठादिक्रमाद
पि कारयेद् योजयेदेकं कनिष्ठांगुलदेशतः अंगुष्ठाग्रं तु निक्षिप्य महायोनिः
प्रकीर्तिताः अथ रश्मिवृंददेवता यथा काली उग्रा काली कपालिनी कुल्ला
कुरुकुल्ला विरोधिनी विप्रचित्ता उग्रा उग्रप्रभा दीप्ता नीला घना बलाका मात्रा
मुद्रा मिता प्रजा दशपंचकोणगता इति अथ सर्वासां ध्यानं यथा तदुक्तं नील
तंत्रे सर्वाः श्यामा असिकरा मुंडमालाविभूषणा तर्जनीं वामहस्तेन धारयंत्यः
शुचिस्मिताः इति श्रीदेव्यादि पंचदशकोणेषु संपूज्य ध्यात्वा वाह्य पूर्वादि अष्टदले
ब्राह्म्यादिका यथा तदुक्तं कुलसद्भावे बहिर्मंडलतश्चापि ब्राह्मी नारायणी
तथा माहेश्वरी च चामुंडा कौमारी चापराजिता वाराही च तथा प्रोक्ता नार

श्यामा
३२

सिंहीं जयेवच अथध्यानं यथा ब्राह्मीं हंससमारूढां स्वर्णवर्णां चतुर्भुजां
चतुर्मुखीं त्रिनेत्रां च वृत्तलक्ष्मं च पंकजम् दंडपद्मालक्ष्यं च दधतीं चारुहा
सिनीम् जटामुकुटधरां देवीं भावयेत्साधकोत्तमः नारायणीं महाशुद्धांश्या
मांगरुडवाहनाम् नानालंकारसंयुक्तां चारुकेशीं चतुर्भुजां खड्गं कपा
लं च चक्रं च संदधतीं पराम् मधुमत्तां मदोल्लासिदृष्टिं सर्वांगसुंदरीम् मा
हेश्वरीं वृषारूढां शुक्लां त्रिनयनान्वितां टंकं च दधतीं देवीं नानाभरणभूषितां
चामुंडां साट्टहासां विकटितदशनां भीमवक्त्रां त्रिनेत्रां नीलां मोलप्रभाभां प्रमु
दितवदनां मुंडमालाविभूषाम् खड्गं मुंडं कपालं नरशवचटितं खेटकं धा
रयंतीं प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चंडरूपाम् कौमारीं कुंकुमा
भां च त्रिनेत्रां शिखिसंस्थितां चतुर्भुजां शक्तिपाशांकुशाभयधारिणीम् ना
नालंकारसंयुक्तां प्रमत्तां परिचिंतयेत् अपराजितां च पीताभामलंकृतां च व
रप्रदाम् कमलं मातुलुंगं च दधतीं परिचिंतयेत् वाराहीं धूम्रवर्णां च वरा
हवदनां शुभाम् हलकं खड्गं मुसलं हलवेदं भुजैर्युताम् नारसिंहीं

नृसिंहरूपविभ्रतीं सदर्शनवपुः अत्र पूर्वादिषु यत्र रवेरुदयः किमथा पूज्यपूजक
योरंतः नाद्यः अत्रागमे सर्वदेवतापूजने पूज्यपूजकयोरंतरेव पूर्वादिषु तत्व
न्नाविशेषवचनात् तदुक्तं शारदाटीकायां यत्रैव भानुरुदेति प्राचीति
तां वेदविदो वदंति अथापरां पूजकपूजयोश्च सदागमज्ञाः प्रवदंति तावत्
अन्यत्र देवीसाधकयोरंतः पूर्वादिदिशिहोच्यते इति तंत्रांतरे ह्यादुर
वं पूर्वभागस्तु दिष्टं सव्यं भागे दक्षिणं भागमाहुः दक्षं विद्यादुत्तरं भागमग्रं प्रत्य
विद्धिः पश्चिमं भावसूत्रैः अन्यत्र तु खमिति संमुखं दिशि स्पर्शः एतेन देवता
पृष्ठमेव प्रतीचीदिगिति बोद्धव्यं यत्तु पुरंदरस्तु खोमंत्री पूजयेत्सुंदरी सदा
देवी पश्चात्ततः प्राचीप्रतीचीचित्रिपुरा पुरः इति ज्ञानार्णववचनं तत्त्रिपुराविषये बो
द्धव्यं देवीमात्रविषयकल्पनेमानभावात् वचनांतरदर्शनाच्च तदुक्तं त
न्त्रे ह्यस्य संमुखं भवेत्प्राची देवी पृष्ठं तु पश्चिमं सव्यं च दक्षिणं विद्याद्दक्षिणं
सव्यमेव चेति अथैवं विधिना सर्वदेवता आवाह्यस्था हात्स्थलांते श्री
महाकालसहितां दक्षिणकालिकां तर्पयामि त्रिः संतर्पयित्वा सोऽहमो

३३
श्यामा

श्यामा
२२

पचारैर्वा मूलदेवीं प्रपूजयेत् मत्रके तर्गले आवाहयेत्प्रतिदले मूलदेवीवत्तर्प
येत् तर्पयेत्कालिकां देवीं सायुधां सपरीवाराम् पश्चादिशि मूलदेवीं संपूज्य
तर्पयेत्ततः अथ षोडशोपचारो यथा मत्रके मंत्रसारे कालीकल्पे पाद्यार्घ्याचमनी
यं च स्नानं वसनं भूषणं गंधपुष्पधूपदीपनैवेद्याचमनं ततः ताम्बूलमर्चना
स्तोत्रं तर्पणं च नमनक्रिया प्रयोजयेदर्चनायामुपचारांस्तु षोडश आसनं स्वा
गतं पाद्यमर्घ्यमाचमनीयकम् मधुपर्काचमनं स्नानं तथा वसनं भूषणे
सुगंधसुमनो धूपदीपनैवेद्यचंदनान् प्रयोजयेदर्शनायामुपचारांस्तु षोड
श दशोपचारो यथा अर्घ्यं पाद्यं निवेद्याथ ततश्चैवाचमनीयकम् मधुपर्का
चमं चैव गंधपुष्पं तथैव ततः धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतम् पं
चोपचारिका अथ पूजायां विशेषो यथा कालीकल्पे श्रीपदं पूर्वमुद्धृ
त्य पादुकां पदमुद्धरेत् पूजयामि नमः पश्चान्मूलये दंगदेवताः कल्पादिताः
पूजनीयाः क्रमेण परमेश्वरि स्वाहा होमेन पेयं च तर्पयामीति संस्मरेत् अथ
मूलमंत्रमुच्चार्य एतत्पाद्यं महाकालसहितायै श्रीदक्षिणकालिकायै नमः

इति गदयोः एवं त्र्यक्षं स्वाहा शिरसि आचमनीयं मधुपर्कं च स्वधा मूर्ध्नि स्नानीयं नमः सर्वांगु
इति सुस्नाप्य शुद्धवस्त्रेण गात्रं प्रोंच्छनं कृत्वा विचित्रपट्टवस्त्रं कस्तूरीकुंकुमचंदनसिंदूरमुकु
टकुंडलहारत्रयादिनानालंकारणानि दत्वा पुनराचमनीमिति मिमेण दद्यात् मदुक्तं तं
त्रांतरे ॥ पाद्यं च पादयोर्दद्यान्नमोंतेन चमं च वित् शिरो मंत्रेण देवि शिरस्यर्घ्यं पाद्यान्छि
रोपरि आचमनं मधुपर्कं स्वधा मंत्रेण वै मुखे स्नानं गंधं हृदा दद्यात् पुष्पाणि वौषडित्यपि
नमो निवेदयामीति सर्वं दद्यान्महेश्वरि स्वधा मंत्रेण निवमिति ब्रह्मण मंत्रेत्यर्घः पूर्णयागे
पि स्वधेत्याचमनीयं च त्रिवारं मुखपंकजे तंत्रांतरे च नमः स्वधा च स्वाहा च वौषडिति य
थाक्रममिति अत्र लिखितवचने ति पूर्वोक्तरसान्स्वाहांतं निषिद्धाचमनीयं नमः स्वधेति
केचिद्वदंति तन्नोसमीहितं अत्रागमणि प्रायपुंसकेन नैव मंत्रोद्धारं क्रियते अत उका
रमध्यपाठो युक्त एव न तु वकारमध्यः अन्यथा पूर्वदाठीकाकारस्याग्र्य वभट्टस्य
लिखितवचन विरोधापत्तेः तद्यथा मधुपर्कं मुखे दद्यात्क्लतं मंत्रेणेदेषु प्लीकरिति
न च मधुपर्कविषयमेवेदं वचनमिति वाच्यं मधुपर्काचमन [?]रेकमंत्रोपादाना
त् तस्मात्तत्रापि स्वधेति पाठो युक्त इति तत्रो मध्यमानामांगुष्ठैर्गंधो नमः इति गंधः

थिकिंच

ध्यामा
३४

अंगुष्ठतर्जनीभ्यां पुष्पाणि चौषट् इति पुष्पौ त्रिः संपूज्य सात्वतनस्वयं भुकुसुममाखमाधूप पात्रं फडिति संप्रोक्ष्य नमति पूज्य पुरतः स्थापयित्वा वामतर्जन्या संस्पृश्य श्रीपा त्रामितेन धूपं निवेदयामि मीति निवेद्य ज्योधनि मंत्रमातर्नमः स्वाहा इति घंटां संपूज्य वामेन घंटां वादयन्मध्यमानामिकांगुष्ठैर्धूमं धृत्वा गायत्री मूलमंत्रं च पठन् त्रिरुत्तोल नं कृत्वा देवी धूपयेत् ततो दीपं संमुखे संस्थाप्य पूर्वं तोयेन पूजनं कृत्वा वामं मध्यमया दीपपात्रं संस्पृश्य दीपं निवेदयामिति निवेद्य पूर्ववद्घंटां वादयन् मध्यमानामिकामध्ये दीपपात्रमंगुष्ठेन धृत्वा दर्शयेत् ॥ ततो द्रव्यं संसृष्टिकं कृत्वा ॐ कालिका लि महाकालि हृ ग्रनमासवं विधिवत् साङ्गं ऊरुः स्वाहेति सप्तधाभिमंत्र्य त्रिखंडयामुद्रया धृत्वा पर पात्रेना मुद्राविधायमूलमंत्रेण इदं मुद्रासहितासवं निवेदयामीति दद्यात् अत्रावसरे आनंदवीजं योजयंते निकेचित् ततो नैवेद्यं सुवर्णादिपात्रे कृत्वा त्रिकोणमंडले परितः संस्थाप्य ईक्ष्य त्यं वषडिति धेनुमुद्रयामृतीकृत्य मूलं सप्तधा जप्त्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृ ष्ट्वा नैवेद्यं निवेदयामीति दत्वा दक्षहस्ते नामिकांगुष्ठाभ्यां मुत्सृजेत् ततः पुनराचम नीयं दत्वा कर्पूरादियुक्तं तांबूलं निवेदयामीति वामांगुष्ठेन धृत्वा पूर्ववद्दद्यात् सर्व पामर्घ्यपात्रजलेनोत्सर्गः कार्यः ततस्तत्तन्मुद्रया ध्येयं तेन देवीं त्रिः संतर्प्य पूर्ववद्यो निमुद्रादिकं दर्शयेत् तदुक्तं तंत्रान्तरे मध्यमानामिकाभ्यां तु अंगुष्ठाग्रेण पार्वति दद्या द्वविमलं गंधं मूलमंत्रेण साधकः अंगुष्ठतर्जनीभ्यां तु चक्रे पुष्पं निवेदयेत् यथागंधं तथा देवि धूपं दद्याद्विचक्षणः मध्यमानामिकाभ्यां तु मध्यपर्वणि दीपिकाः अं

गुष्ठाग्रेण देवि प्राप्य त्वा धूपं निवेदयेत् उत्तोलनं त्रिधा कृत्वा

गायत्र्या मूलयोगतः तत्वाख्यमुद्रयादेवि नैवेद्यं तु निवेदयेत् मूलेन च मनं ४

दत्वा तांबूलं मनेन शुद्धया तेन तत्वेनेत्यर्थः अत्र अटीकायां धूपमाहतनमात्रे ण श्रीस्वाप कर्षं हृदामुना मंत्रेण शुद्धिमां घंटां वादयेन्निवेदयेत् अत्र अपि तनद्गुनितजोमंत्र मातः स्वाहेतु दीपं च अन्यच्चा वादयेत् घंटां मुध्य वैः धूपयेत् ततः नैवेद्य ततः सम पयेद्धूपं घंटावादन युक्तं नैवेति एवं दीपदाने घंटावादनमिति टीकाकारः निवेदयेत् सुरोमांगे गंधपुष्पं च धूपम् त दीपं दक्षिणे तोयदद्यात् पुरतो वा नवाम ततः धूपमग्रे वा वामेन तु दक्षिणे वा मे पुरतो वामदक्षतः तत्र दीपं दक्षिणे तिल दीपं वामतः इति सांप्रदायिकं एवं क्षित्वा वनिर्दिष्टे दक्षिणे ततः दक्षिणे वामतः इति टीकाकारः संमुखे नियमः वामदक्षिणभागेषु देवतायां एव न तु साधकस्य वचनांतरदर्शनात् धूपदी पौ च मौस्त्यं च देवतामग्रे निवेदयेत् नैवेद्यमिति क्षिप्तं चेद्देवतावामे अग्रं चे द दक्षिणे तु विशेषतः अथ पुष्पनियमो यथा सुगंधैर्वर्णकैः हृत्पद्मे समैर्धर्वयेत्कै तैः विशेषैर्मल्लिकायैश्च तुलसीवर्जितैः पुष्पैः अष्ट पुष्पैः विशेषेण वक्षपुष्पाणि विशिष्टानि सर्वं पुष्पं प्रदद्यात् प्रपन्नियुक्तेन चे

श्यामा
३५

गता *शारदाटीकायां* सर्वैः पुष्पैः सदा पूज्या विहितैरविहितैरपि कर्त्तव्या सर्वदेवा
नां भक्तियोगोत्र कारणम् देवानामिष्टफलदा ह्देवीनामपि बोद्धव्यं *तन्त्रे तन्त्रा*
न्तरे देवी पूज्या सदा कार्या जलजैः स्थलजैरपि विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन
चेतसा नानोपहारैर्बलिभिः नानापुष्पैः मनोरमैः अपामार्गदलैर्भृङ्गैस्तुलसीद
लवर्जितैः पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये अथ पुष्पदाननियमं
यथा *तन्त्रे शारदाटीकायां* पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् दुःख
दं तत्समाख्यातं यथोत्पन्नं तथार्पणम् अधोमुखं फलं नेष्टं पुष्पाञ्जलिविधौ न हि
अथ नैवेद्यं यथा *तन्त्रे मत्स्यसूक्ते* पायसं कृसरं दध्याज्यं शर्करागुडमिश्रितम्
गव्यक्षीरं मधुपर्कं तथान्यानि निवेदयेत् शालमत्स्यं च पाठीनं गोधामांसमनु
त्तमम् अन्नं च मधुनायुक्तं यत्नाद्दद्याच्च मन्त्रवित् हस्तमात्रं तिलतण्डुलमिश्रि
तैः *अन्यत्रापि* कृदपक्वं स्नेहपक्वं तु यत्पक्वं च पायसम् मनःप्रियं च नैवेद्यं
कुर्याद्देव्यै पुनः पुनः कृदपक्वं पिष्टतण्डुलादि स्नेहपक्वं लड्डुकादि *कुला*
दीकल्पेपि जाम्बूलं च सखर्जूरं नारिकेलं सशर्करम् पायसं सघृतं चैव आद्र

कं सगुडं तथा सतण्डुलं तिलं चैव दधि चैव सशर्करम् क्षीरपनसं चैव आम्रा
तकफलं तथा कदलीनारिकेलं चैव श्रीफलं फलमुत्तमम् कर्कञ्चनफलं चैव ना
लखर्जूरमेव च अन्यानि च सुगन्धीनि स्वादूनि च फलानि च नराः खगास्त
था मेषा महिषाः शशकास्तथा एतेषां चैव रक्तानि देयानि परमेश्वरि नरबलि
दानं च महीभुजां कार्यं नान्येनापि *तन्त्रे यामले* राज्ञा नरबलिं दद्यान्नान्योपि
परमेश्वरि नैवेद्यपात्रं च *यामले* तैजसे पुष्पपात्रे सौवर्णे राजतेथवा ताम्रे
वा प्रस्तरे वापि पर्णपात्रेथवानघ यज्ञदारुमये वापि नैवेद्यं कल्पयेद्बुधः
सर्वाभावे तु माहेयं स्वहस्तघटितं यदि यज्ञीयमदीपपात्रेषु त्रिधा विनिवेद
येत् अमलान्येषु कृष्णमृत्पात्रस्थितैर्बृहतैः नरह्ला महादेवी दत्तं विधिपश्च
तैरपि अन्नपात्रमेदो न हृतः *श्रीतत्त्वचिन्तामणौ अनुसन्धेयः* अथ पूजांग
लिः श्रीदक्षिणावरणे तेष्वृजयामीति आसांपूहीत्वा अग्नीशासुरवायव्यस
पुरोदित्वा च सर्वान्तः षडङ्गमन्त्रेण षडङ्गं पूजयेत् *तन्त्रे ज्ञानार्णवे* अग्नीशा
सुरवायमध्ये दिक्षु अंगपूजनं *तन्त्रान्तरे* ऊर्ध्वहृदयमाग्नेय्यामीशान्यां च

३६

प्रपामा
३६

शिरो यजेत् नैऋत्यां च शिखां संपूज्य वायव्यां कवचं यजेत् आग्नेय्यां पुरतो नेत्रं
दिक्षु चास्त्रमथार्चयेत् वज्रादि दिक्षु संपूज्य स्तम्भनन्दं गेषु वा क्रमात् आसो
ध्यानं यथा तुषारस्फटिकप्रख्यं नीलकृष्णारुणद्युतिः वरदाभयधारिणः
प्रधानननवः स्मृतः अथ गुरुपंक्तिं यजेत् तदुक्तं शारदातिलकायां वायव्या
दीशपर्यंतं गुरुपंक्तिं समर्चयेत् तदशक्तौ गुरुत्रयं पूर्वमंत्रं वा तदुक्तं तंत्र
चूडामणौ महादेवि महामाये एवं प्रोक्तं प्रवर्तिते इदानीं श्रोतुमिच्छामि गु
रुक्रमसमुत्तमम् श्रीदेव्युवाच गुरुक्रमं तु बहुधा मंत्रविस्तारगौरवात् का
लानामप्यनादित्वात् कथं तत्कथयामि ते अस्मात्तु गुरुत्वं तु लं देव नष्टमार्गो भवि
ष्यति नष्टमार्गे कथं तत्र विधेन ताहश्रफलगोचरे गुरूणां शिष्यस्तत्रानां नास्ति
वेदसंततिक्रमः तत्र मंत्रास्तु विद्यास्तु निष्फला नात्र संशयः विंशतिः पुरुषा वा
पि तत्र सप्तत्रयोपि वा तस्मात्तु गुरुवाचानां शिष्यस्य नष्टसंततिः स्ववंशाद
धिकं ज्ञेयं गुरुवंशं महाप्रभुम् जनकादधिको ज्ञेयो मंत्रदाता महेश्वरः
तस्मात् सर्वत्र देवेशि संक्षेपात् कुरु तान् गुरून् आदौ सर्वत्र देवेशि मंत्रदः प

रमो गुरुः परापरगुरुस्त्वं हि परमेष्ठि रहंततः सर्वतंत्रेषु विद्यासु स्वयं प्रकाशिते
षिणी ततः पुरुषत्रयं पादतः स्वगुरुसंततिः तेनैवाहं प्रदर्शनात्त्वास्ता समस्तास्व
विशेषतः सर्वतंत्रेषु गुरवः सर्वसिद्धिप्रदायकाः दिव्यौघास्तु समासेन कथ
यामि तवानघे तत्रादौ कालिकादेवी नत्वा स्मृत्वा गुरुक्रमम् महादेवी महा
देवः त्रिपुरश्चापि भैरवः दिव्यौघा गुरवः प्रोक्ताः सिद्धौघं कथयामि ते ब्रह्मानं
दः पूर्णदेवः चलचित्तः चलाचलः कुमारः क्रोधनश्चैव वरदः स्मरदीपनः
मायामायावती चैव मानवौघं शृणु प्रिये विमलः कुशलश्चैव भीमसेनः सुधाक
रः मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः मूलदेवो रतिदेवश्च विघ्नेश्वरो
हुताशनः समयानंदसंतोषा कालिकागुरवः स्मृताः अत्र विशेषो यथा
तदुक्तं तंत्रांतरे देवाः संति खेचरत्वं सिद्धाश्च मा विहायपि च मानवौघा मानवे
षु मनमध्रूपधरास्सदा आनंदनाथशब्दांता गुरवः सर्वसिद्धिदः स्त्रियोपि गुरु
रूपास्तु अंबांताः परिकीर्तिताः मानवौघांतरे देवि स्वगुरुं परिपूजयेत् भाव
चूडामणौ अथवा सर्वशास्त्रेषु गुरवः सर्वसंविदः कुलचूडामणौ देवस्

श्यामा
३१

एवङ्क्रमाहिताः येषु येषु च मंत्रेषु ये ये ऋषिगणाः स्मृताः तेतेऽर्च्याः सपर्या
दौ संक्षेपो गदितो मया अज्ञानाद्गुरुनाम्नां वै गुरुस्थितयमर्चयेत् चतुष्टयं वा
संकोचो न च कार्यस्तु ततः परम् गुरुः परमगुरुश्चैव कामदा गुरवः स्मृताः गुरुश्
लोविना वत्स यदि पूजां समाचरेत् तद्दोषशमने वत्स कुलदोषसमाचरेत् वि
गुणं यत्र यस्मात्तु स्वगुणं कुलपूजनात् कुलावलोकनं चैव तस्मात्कुलसालोचमा
र्जनम् कचस्नानं तथा वा शुद्धिः कुचन्यासविशोधनं दीक्षाप्रभृतः कुलीनां तु कुलं
वा वदुकेऽस्थरम् तद्देहं गुरुमानीय कुलरूपं गुरुं स्मरेत् कुलं गुरुस्तथा सत्तत्र
तथा कुलसाधकः गुरुक्रमश्च कथितो गोपनीयः प्रयत्नतः न देयं यत्र कुत्रापि
योगभ्रष्टे च वंचके पशोरग्रे न चैवैषां नाम ग्राह्यं कुलेश्वर वेश्मवेशान्ते तेवा
गाणपत्येऽथवा पुनः नित्यं गुरुं पुराध्यात्वा नमो गुरुचतुष्टयं पूजयित्वा यत्ने
द्वं न च संकोचमाचरेत् अथ प्रयोगः महादेव्यां वा श्रीपादुकाभ्यो नमः इ
ति संपूज्य पूर्ववत्तर्पयेत् एवं क्रमेण गुरुं संपूज्य मानवौघान् गुरून्
पूजयेत्तर्पयेच्च ततो रश्मिं हृदयदेवताः पूजयेद्यथा बाह्यत्रिकोणस्य संमु

खं त्रिकोणे ॐ काली श्रीपादुकां पूजयामि नमः इति पाद्यादिभिः संपूज्य योगिनी
पात्रामृतेनानन्दमुद्रया त्रिः सन्तर्पयेत् एवं दक्षिणे ॐ कपालिनी श्रीपा
वामे ॐ कुल्लां ततः दक्षिणत्रिकोणे ॐ कुरुकुल्लां ॐ विरोधिनीं ॐ विप्रचित्तां ततः दक्षि
णत्रिकोणे ॐ उग्रां ॐ उग्रप्रभां ॐ दीप्तां ततः दक्षिणत्रिकोणे ॐ नीलां ॐ घनां ॐ
बलाकां ततः दक्षिणत्रिकोणे ॐ मात्रां ॐ मुद्रां ॐ मित्रां पाद्यादिभिस्त्रिसंपूज्य पू
र्ववत्तर्पयेत् देव्या दक्षिणे महाकालं यजेत् ततो कुमारीकल्प देव्या वामदक्षि
णे भागे महाकालं समर्चयेत् ततोऽष्टदले पूर्वादिक्रमेण अष्टशक्तीः पूजयेद्यथा
पूर्वे ब्राह्मी श्रीपादुकां पूजयामि नमः इति पाद्यादिभिः संपूज्य त्रिस्तर्पये
त् अग्नौ ॐ ईं नारायणीं दक्षिणे ॐ ऊं माहेश्वरीं नैरृत्यां ॐ अं चामुण्डां वारुणे
ॐ लं कौमारीं वायव्ये ॐ ऐं अपराजितां उत्तरे ॐ औं वाराहीं ईशाने ॐ अः ना
रसिंहीं एवं वक्ष्यमाणं पूजयेत्तर्पयेच्च ततो कुमारी द्वितीयचतुर्थषष्ठाष्टदशद्वादश
चतुर्दशषोडशस्वरभेदेन प्रथमे यंत्रमध्ये आवाहनं नैवेद्यपूजनं कुमारीकल्प
ब्राह्मणा पूजयेत्पात्रे पचाग्रे भैरवान् यजेत् लोकपालं ततो बाह्ये तद्वहि

श्यामा
३८

वनहुतिः अत्र प्रयोगः पश्चात्पूर्वादिदलावर्णेन पूजयेद्यथा ऐं ह्रीं रुरुवटुक
भैरवं ऐं त्रिपुरांतकभैरवं ऐं वह्निवेतालभैरवं ऐं अग्निजिह्ववटुकभैरवं ऐं
कालवटुकभैरवं ऐं करालवटुकभैरवं ऐं एकपादवटुकभैरवं ऐं भीमरवटु
कभैरवं पूजयेत्तर्पयेच्च ततो इन्द्रादिलोकपालांस्तदस्त्राणि च
तर्पणनियमे यथा कुलार्णवे त्रिवारं तर्पयेद्वापि सकृद्वापि यदृच्छया इति
सर्वासामपि दातव्या बलिः पूजा तथैव च अनुलेपनपुष्पं च धूपदीपौ च पान
कम् त्रिस्त्रिः पूजा प्रकर्तव्या सर्वासामपि साधकैः ततो देव्या अस्त्रं पूजयेत्
यथा देवीवामोर्ध्वहस्ते ॐ खड्गं अधोहस्ते ॐ मुंडं दक्षोर्ध्वे ॐ अभयं
तदधः ॐ वरं पूजयेत्तर्पयेच्च ततः षडंगन्यासं विधाय पूर्ववद्देवीं ध्यात्वा
गंधपुष्पासनहृद्यधूपदीपं दत्वा पूर्ववन्मुद्रां बद्ध्वा धूपदीपादिकं दर्श
येत् ततः पानादिकं दत्वा पूर्ववन्नैवेद्यादिकं निवेद्य त्रिस्तर्पयेत् ततः
पुष्पांजलित्रयेण देवीं संपूज्य सायुधां सवाहनां सपरिवारां महाकालस
हितां श्रीदक्षिणकालिकां पूजयामि नमः इति पुष्पांजलित्रयेण त्रिःस

म्पूज्य त्रिस्तर्पयेत् ततो योनिमुद्रादिकं पूर्ववद्दर्शयेत् ततः
पुनर्मूलदेवीमुद्रातर्पणपूजनैः अर्चयित्वा जपं कृत्वा नुत्वा विसर्जयेत्सु
धीः कालीतंत्रेपि एवं प्रणाममंत्रं कृत्वा मूलेनैव यथाविधिः नैवेद्यादी
न्यथाशक्त्या दद्याद्वै पुनः पुनः ततो वै दशधावर्तं दीपं दत्वा च साधकः
पुष्पांजलिं पुनर्दद्यान्मूलेनैव यथाविधिः कुमारीकल्पेपि ततो नीराजनं कु
र्याद्दशवारं प्रदीपकैरिति अथोक्तं च त्रिकोणमंडलमालिख्य तिलरत्नपुष्प
न्नं तुलाद्यान्नि च पक्वीकृत्य तत्र संस्थाप्य ॐ ह्रीं श्रीं दक्षिणकालिकायै स्वाहा
एष बलिर्नमः इत्युच्चार्य तेन तं ध्यायेत् पूजांते भोजनाद्यौ च बलिं द
द्यान्महेश्वरि ततः प्राणायामं कृत्वा कामकलां विभाव्य शिरसि गुरुं ध्यात्वा
हृदि देवीं भावयन्मनसा अष्टोत्तरसहस्रं रहस्यमालया वर्णमालया सोत्तरं दत्वा
प्रणम्य पुनः प्राणायामादिकं कृत्वा अर्घ्यजलं पुष्पादिकं गृहीत्वा गुह्याति
गुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महे
श्वरि इत्यनेन तेजोमयं जपफलं देव्या हस्ते समर्पयेत् अथ परहे

श्यामा
३९

स्फमालायथा तदुक्तं कालीतंत्रे रत्नमालमालयाचैवशालंदं तेनमेरुणा प्र
जपेदित्यर्थः तस्यद्वादशपटलेपिरत्नमालिकायांतुस्फटिकाद्यमितुर्ल
भा इतिप्रजपेदित्यर्थः अथवर्णमालायथा तदुक्तं विशुद्धेश्वरमहातंत्रे
मालाविधानंपरमंसर्वेषांपावेतितत्त्वतः येनविज्ञानमात्रेणमंत्राःसिद्ध्यंतितत्
क्षणात् अनुलोमविलोमेनमंत्रवर्णविभेदतः मंत्रेणतरिनास्तीरत्नवर्णे
नांतरितंमनुम् कुर्याद्वर्णमयीमालांसर्वमंत्रप्रदीपिनीम् वरमार्गेणमे
रुरूपंलंघनंनैवकारयेत् एतत्परमरहस्यंमयोक्तंतेयशस्विनि त्वया
गुप्ततरंकार्यंनाख्येयंयस्यकस्यचित् अन्यांतरेउक्तं यामलेयथा स
विंदुंवर्णमुच्चार्यपश्चान्मंत्रंजपेत्सुधीः क्षंमेरुंवैकल्पयित्वाजपेत्तंचैव
लंघयेत् इति अथकरमालायथा रुद्रयामलसंहितायां तर्जन्यग्रे
तथामध्येयोजपेत्सतुपापभाक् अनामायात्रयंपर्वकनिष्ठायास्त्रिपर्वि
का मध्यमायात्रयंपर्वतर्जनीमूलपर्वणि जपेदित्यर्थः हंसपारमेश्व
रेपि पर्वद्वयमनामायाःपरिवर्जनेनकारयेत् पर्वत्रयंमध्यमायास्त

र्जन्येकंसमावहेत् शक्तिमालासमाख्यातासर्वमंत्रप्रदीपिका नित्यजपं
करेकृत्वातत्तुकाम्यंकदाचनेति स्वयंकृतो तदुक्तंयामले बलिस्नानादिकं
सर्वंनिशायांक्रियतेसदा तत्रदत्तयत्नांयातिकालीविद्याप्रसादतः कुलचू
डामणौच रात्रौपर्यटनंचैवरात्रौचशक्तिपूजनं तत्करोतिवत्सदेवसाधकः
कौलिकोभवेत् ततःकाम्यबलिंदद्यात् तदुक्तंकालिकापुराणे छागंतुका
मतोदद्यादात्मनोदेहशोणितम् नाभेरधस्तद्रुधिरं पृष्ठभागस्यचप्रिये
सुगंधिरुधिरंदद्याच्चकदाचित्तुसाधकः नोष्ठस्यचिबुकस्यापिनेंद्रियाणां
तथैवच कंठाधोनाभितस्त्रोर्ध्वंहृद्भागस्यचयत्नतः पार्श्वयोश्चापिरुधिरं
दत्तयैवनिवेदयेत् तिलसुद्गप्रमाणंवादेव्यैदद्यात्तुभक्तितः बाहुमांसा
द्यत्नेनत्त्रतामसिद्धमवाप्नुयात् ततोदेवीवचनमाणस्तवेनस्तुत्वाप्रद
क्षिणंविधायाष्टप्रणामंकुर्यात् तदुक्तंकालीतंत्रे ततोवैशिवसिद्धंदत्वा
शीर्षंप्रणम्यचेति अथप्रदक्षिणंयथा प्रसार्यदक्षिणंहस्तंस्वयंनमः
शिरःपुनः दक्षिणंदर्शयेत्पार्श्वेमनसापिचदक्षिणः त्रिधावेष्टये

४०
श्यामा

कु०मा
५०

त्सर्वं कालिकायाः प्रदक्षिणः सर्वप्रदक्षिणो ज्ञेयः सर्वदेवौघतुष्टिदः अ
र्धोनारूपानंयस्तु कालिकायाः प्रदक्षिणं सर्वान्कामानवाप्नोति पश्चान्मोक्ष
मवाप्नुयात् अष्टांगप्रणामो यथा दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिर
सा दृशा मनसा वचसा चेति प्रणामोऽष्टांग ईरितः अथ पंचांगप्रणामं कु
र्याद्यथा बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया पंचांगकः प्रणामस्तु
विद्वद्भिः परिकीर्तितः अथ सामयिकैः सह पानादिकं कुर्याद्यथा चक्रा
कारेण पंक्त्याकारेण वा भित्वाऽऽसनेन साधकैः सह शक्तियुक्तैः स्वेनयुग्मक्रमे
ण अ आसनेनोपविश्य सामयिकं ललाटे चंदनादानं दत्वा शिवशक्तिबुद्ध्या
पुष्पं च दद्यात् तमो यदि गुरुस्तत्र तिष्ठति तदादौ गुरुं गंधपुष्पादिना पू
जयित्वा तत्पात्रं शुद्धिसहितं तस्मै समर्प्य प्रणमेत् गुरोरभावे तत्पात्रं देवले
निक्षिपेत् ततः शक्तिपात्रं शुद्धिसहितं शक्तये दत्वा सामयिकेभ्योपि ज्ये
ष्ठानुक्रमेण वीरपात्रात्परागतं शुद्धिसहितं पात्रं दद्यात् ततः सामयि
कोपि मत्पाहस्तद्वयेन संगृह्य तदुपरि स्थिधात्मा सर्वदानंदभैर

वभैरव्यौ संतर्प्य गुरुदेवतां तर्पयेत् ततः स्वकल्पोक्तविधिना तत्वशुद्धिं कुर्यात्
ततस्तस्मै सह पात्रवंदनं कुर्यात् यथा श्रीमद्भैरवशेखरप्रविलसच्चंद्रामृत
प्लावितं क्षेत्राधीश्वरयोगिनीसुरगणैः सिद्धैः समाराधितम् आनंदार्णवकं परा
त्मकमिदं साक्षात्त्रिखंडामृतं वंदे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् इत्य
भिवंद्य वामहस्तेन पात्रमुत्तोल्य वंदनं कृत्वा गृह्णामि त्वहो मीति गुरुशक्तिसाधकै
रभ्यनुज्ञां गृह्णीयात् ते च तदस्तु इति ब्रूयुः ततो मूलाधारात् कुंडलिनीमिष्टदेवता
स्वरूपामाजिह्वांतं विभाव्य गुरुपादुकां स्मृत्वा शिवोहमिति विचिंत्य हस्ताभ्यां
पात्रं धृत्वा मूलमंत्रमुच्चरन् कुंडलिनीमुखे देवीं तर्पयेत्
हृत्वा मंत्रमनुं स्मरेद्गुरुपदं देवीकलां चिन्मयीं पश्चात्पात्रवरं पलासवमृ
तं दीपैर्युतं कज्जलैः पुष्पाक्षिप्तमभिमंत्रितं च निविडं संमोहनं चासनां येसं चिंत्यपि
वंतिमधुपं तेश्वतिस्तुतिं परात् सिंदूरतिलकं भाले पाणौ च मदिरारसं
कृत्वा पिबेद्गुरुं ध्यायेत्तथा देवीं च चिन्मयीम् इति ततस्तत्पात्रमाधारोपरि संस्था
प्य पुनस्तेनैव क्रमेण परागतं गृहीत्वा पात्रवंदनं कुर्याद्यथा हेमं मीनरसा

कुपामा
४२

वहं दक्षिणयादत्तं चपेयादिभिः किंचिच्चंचलरक्तपंकजदृशा तस्मै समावेदितम् वामे
स्थाउ तत्त्वविशुद्धिकरणं पाणौ विधायात्मके वंदेपात्रमहं द्वितीयमधुनानंदैकसंवर्ध
नम् ततः पूर्ववत्पात्रं स्वीकृत्यान्यत्पात्रं वंदनं कुर्यात् सर्वान्नायकलाकलाप
कलितं कौलहलो धोतनं चंद्रोपेंद्रहुताशभानुधणं शुक्रहरणब्रह्मादिभिः सेवितम् ध्यातं
देवगणैः परंस्तुतिगणैर्मोक्षार्थिभिस्सर्वदा वंदेपात्रमहं तृतीयमधुना विज्ञानगोप्य
ममृतम् मत्स्यमीनरसावहं हरिहरब्रह्मादिभिः पूजितं तु धामे पुनधर्मकर्मनिरतं
चारीलक्षितृप्यम् आचार्याष्टकसिद्धभैरवकुलाधीशेन संशोधितं पायात्पंच
मकारतत्वसहितं पात्रं चतुर्थं नमः आधारेषु जगाधिराजवलये पात्रं महीमंडले
दुर्लक्ष्यं समस्तसत्त्वविकारि विधिना चाद्यो च दिव्यं स्थितः सोऽहं भैरवमर्चयन्प्रतिदिनं ता
रागणैर्वनितैरादित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः किंकरैः इति पंचमं पात्रं
छत्रं चामरमक्षपीठपरमानंदोदयं दायकं वाजी दंति मनोहरं सुखकरं सायु
ज्यसौराज्यपदम् नानाव्याधिमवांधकारहरणं अज्ञानरध्वंसनं श्रीमद्भैरवमे
रवीप्रियतरं पात्रं च षष्ठं नुमः आयस्यप्रसुष्ठप्तिबोधपवनं चैतन्यसाक्षिप्र

दं विघुङ्गास्करवह्निचंद्रधनुषो ज्योतिष्कलाव्यापितं वामादिंगलमध्यगात्रिव
लयासक्तं कुंडलीचोर्ध्वगा पात्रं सप्तमसस्तु दुःखानलकृणं तेदप्रदं पातु माम् ७ खंडं
पादुकमं कुलेसुतिलकं वंधेहि सारस्वतं शास्त्रोवायुलशौर्यकार्यहरणं देह
स्थितेकारणं वांछासिद्धिकरं समस्तस्थितिकरं वश्यं [illegible] योषितां पात्रं चाष्टमम
ष्टसिद्धिकरणं प्रौढप्रतापं भजे ८ सर्वानंदकरं सदाशिवपदं सर्वार्थसंप
त्प्रदं साम्राज्याधिकारं समस्तसुखदं चाज्ञानविध्वंसनं आयुःकांतियशोविव
र्धनकरं संसारमोहच्छिदं पात्रं लक्षगुणात्मकं च नवमं प्रौढप्रतापं भजे ९
ब्रह्माविष्णुमहेशानां देवानां च विशेषतः दुर्लभं पानकं पात्रं दशमं प्रणमाम्यहं
पापघ्नं शांतिसौख्यदं दिव्यसौख्यालयम् पात्रमेकादशं वंदे श्रुभं सेवासु
खावहम् ११ पात्रं कृत्वा करे मंत्री सर्वकर्मलमेसुधीः इहलोके प्रियं भुक्त्वा
देहांते भैरवो भवेत् देहस्याखिलदेवनागगणमुख्याः क्षेत्राधिपः भैरवा योगि
न्यो वटुकाश्च यक्षपितरः पैशाचिकाः चेटकः अन्ये भूचरखेचराः प्रतिपगाः
वेतालभूतग्रहाः तृप्तास्तुः कुलपुत्रपौत्रपितरः पानं समं मासिकम् अथ

प्र.पा.मा.
४२

प्रमाणं यथा तदुक्तं रुद्रयामले साधकेभ्यश्च शक्तिभ्यो दद्याद्द्विमाल्पचंदनं
सामयिकैस्समं कुर्याद्द्रव्यपानादिमस्तणम् अन्यत्रापि विन्यस्य चक्ररूपेण
पंक्त्याकारेण वा यथा तदुक्तं कुलसारे नयनाग्निबाणसंख्या कार्या गुरुकुलसा
धने हेतुपानप्रकर्त्तव्यमित्युक्तं परमेश्वरि इतोऽप्यधिकपानं तु न कर्त्तव्यं गुरुसा
धकैः अथोत्तरतन्त्रे अवलोक्य पुरतो लब्ध्वा शुद्धामीति स्वयं वदेत् ऊर्ध्वरवेस्त्वनु
ज्ञात्वा गुरुरूपमेवाकुलीनकैः शुद्धीयाच्च स्वयं सिद्धो पिबेत्प्रासनः सुधीः कु
लार्णवेऽपि एकासनोपविष्टाये शुद्धनेचैकभाजने एकपात्रेन याऽश्नन्ते यान्ति
नरकेऽधमे एकपात्रेऽपि सर्वैर्मिलित्वा एकस्मिन्पात्रे न पेयं तत्तु प्रतिवारं
द्रव्यपाने भिन्नं भिन्नं पात्रं कार्यम् अत्रैव शानापत्तेः संप्रदायाविरोधाय विना
मंत्रेण यात्ववा विनामांसेन तर्पणं विनाशक्त्या च यत्पानं तत्सर्वं निष्फलं भवे
त् स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुसंमताः पाययित्वा पिबेद्द्रव्यमिति शा
स्त्रस्य निश्चयः नपदं पात्रस्पृशेत्पात्रं न बिंदुं पातयेदधः शक्तिपुत्रौ वसेद्वापि
युग्मयुग्मविधानतः शिवशक्तिधिया सर्वं चक्रमध्ये समर्चयेत् अथ पात्र

परिमाणं यथा तदुक्तं कुलसारे नैकहस्तेन दातव्यं न मुद्रावर्ज्जितं पिबेत् नार्चये
देकहस्तेन न मुद्रावर्ज्जितं पिबेत् नार्चयेदेकहस्तेन न पिबेदेकपाणिना अ
नोत्थवंदनं कृत्वा पिबेन्न दत्तं पुनः सव्येनोद्धृत्य पात्रं तु शुद्धं कृत्वा प्रसन्नतः
विना सव्येन योगेन न कुर्याद्गुरुसंगतिम् साधारं नोद्धरेत्पात्रं साधारे तु विनि
क्षिपेत् पात्रं न चालयेत्स्थानान्न कुर्यात्पानसंकरं सशब्दं न पिबेद्द्रव्यं न त्यजेच्च
न पूरयेत् न स्थूलं नैव सूक्ष्मं च पात्रं कुर्यान्मनोरमम् उच्छिष्टेन स्पृशेच्चक्रं
कुलद्रव्याणि सुंदरि बहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् निष्ठीवन
मधोवायुं च चक्रमध्ये विवर्जयेत् चक्रमध्ये घटं अग्रे पात्रे च पतिते भुवि दीपना
शे च शांत्यर्थं श्रीचक्रं कारयेत्सुधीः स्वपात्रस्थितं हेतुं च न दद्याद्भैरवाय च दत्ते च
सिद्धिहानिः स्यात्कृत्वा भवति योगिनी परिहासं प्रलापं च वितंडां बहुभाषणं क्रो
धालस्यं भयं क्रोधं च चक्रमध्ये विवर्जयेत् अन्योन्यमीडयेत्पात्रं न पात्रं पातयेदध
धः गुरुशक्तिसुतानां च गुरुद्रोहश्च निष्ठयोः उच्छिष्टं भक्षयेत्स्त्रीणां दद्यात्स्वो
च्छिष्टमेव हि दद्यात्स्नेहेन योऽल्पः समवेदावर्दापदम् अन्यत्रापि

श्यामा
४३

शक्तयुक्तिं ध्यायेत्संविवेक्षमध्यं वीरोद्वाहिः हृदये कुर्वर्वयेत्। शान्तिवीरप्रसादेन किं न सिद्ध्यति सुन्द
रि। पीत्वा पीत्वा पुनः पीत्वा पीत्वा पतति भूतले। उत्थाय च पुनः पीत्वा पुनर्जन्म न
विद्यते॥ ततः शान्तिस्तोत्रं पठेत्। पीत्वा नानाविधैर्द्रव्यैर्दिवि शान्तिस्तोत्रं प
ठेन्नरः। तस्य पुत्रेण तद्भार्या आडम्बरं स्यापुद्रूपकानराः साधकानां शिवा सन्तु ध्याना
युवतिपालनं जयन्ति मातरः सर्वा जयन्ति योगिनीगणाः। जयन्ति सिद्धडाकिन्यो
जयन्ति गुरुपङ्क्तयः। जयन्ति गुरुसद्भावा जयन्ति गुरवः सदा। जयन्ति साधका
स्सर्वे विशुद्धाः कौलिकाश्च ये। जयन्ति समयाचारसंपन्नाः पूजका नराः। नन्द
न्तु शाक्तिका सिद्धा नन्दन्तु कुलपालकाः। इन्द्राद्या देवतास्सन्तु तृप्यन्तु वास्तुदेव
ताः। चन्द्रसूर्यादयो देवास्तृप्यन्तु मम भक्तितः। नक्षत्राणि ग्रहा योगाः करणा
राशयश्च ये। सर्वे ते सुखिनो यान्तु सर्पा नद्याश्च पक्षिणः। पशवस्तुरगाश्चैव
पर्वताः कन्दरा गुहाः। ऋषयो ब्राह्मणाः सर्वे शान्तिं कुर्वन्तु मे सदा। स्तुता मे स
र्वदा सन्तु सिद्धास्तिष्ठन्तु पूजकाः। ये ये पापरतास्सत्त्वाः परिपन्थिन्यो मदादर
पूजने देवा वा चापि विघ्नकर्तारस्तु हृदयाग्रस्थाः च ये साधकाः। इत्थं च म

पूर्वं ज्ञानहृदयायै कौलिकद्रूपका ... नेयां तु विनाशमत्र सम्मये श्रीभैरवस्याज्ञ
या। ततो यथाविधि शिवशक्तिसंयोगं कृत्वा देवीपदमाकाने समर्प्य श्रीपात्र
मुद्रोत्पादेव्या उपरि त्रिधा भ्रामयित्वा पुनः संस्थाप्य संहारमुद्रया देवीं स्वहृदि
समानीय श्रीदक्षिणकालिके पूजितासि क्षमस्व इति विसृज्य ऐशान्यां मण्ड
लिकं कृत्वा निर्माल्यं निर्माल्यवासिन्यै नमः इति मण्डले संपूजयेत्। देवतायाश्च
संयोगो देवतास्त्रीणां नैमित्तिकं। संयोगं तु परं कृत्वा देवी हृदि समानयेत्। पूज
कृत्वा मत्रैकंत्री ... कार्यो विचारणे। ... समर्पणं मन्त्रो यथा। ॐ इतः
पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा क
र्मणा पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मां म
दीयं श्रीदक्षिणकालिकाचरणे समर्पयामि ॐ तत्सदिति पठेत्।
विसृज्य परया मन्त्रात्सन्निधापनमुद्रया। उद्वास्य हृद
ये देवीं तन्मयो भवति ध्रुवम्। पुरश्चरणकाले तु पूजा सैषा प्रकीर्तिता
हृदये च बहिर्देवीं समर्प्य विधिवद् बुधः। निर्माल्यं वै स्वचोद्दिशेत्...

पुणामा
४४

वेद्यमर्चयेत्पुनः ततः सदाशिवेनैव हृंसौ मायाबीजेन कनिष्ठांगुलिनाति
लकं कुर्याद नेन यंयं स्पृशति पादेन यंयं पश्यति चक्षुषा सर्वदास
र्वतायाति यदि शक्रसमो भवेत् ततो यंत्रलेपं कृत्वा संरक्ष्येत्वा तं वेद्यं सर्वदेवेभ्यः
साधकाय च दत्वा शेषं स्वीकृत्वा सोहमिति भावयन् बाह्यतो वैष्णवाचार
परायणेति सर्वंगोपयन्यास्तु सर्वं विहरेत् गडकेकुलद्रव्यमाणा गुप्तेस्थाने त्
ताम्रे पात्रे यंत्रलेपं तु धारयेत् नारिकेल्योन स्वर्णेभ्योन पशुभ्योन वाद्धिते कु
लीनाय च दातव्यमथवा स्वजलमध्यगतः ततः सोहमिति ध्यात्वा वैष्णवाचारत
त्परः हरिनाम जपन् भावो भावो खिलविवेष्टितः वीरवद्विचरेद्देवाः सदा संग
विवर्जितः यामलेपि नैवेद्यं पुरतो दत्वा वांकुर्याद्विशुध्यात्मये तस्माद्देवेश
रक्षेशे वरुणे वैश्रवेपि च अग्नाय सूर्याय गणेशाय यमाय च वटुकायैव
क्षेत्रपालाय पिशाचाय धनदाय च ईशानाय महादेवि साधकाय प्रदापयेत्
ततस्त्रिपुरापदं तु पलब्दाणमिति अथ देवी विसर्जनानंतरं पानादिकं का
र्यमिति गडकेसामार्णवे वीरमेकांतकामिनः यामलेपि पानं तु त्रि

विधं देवि दिव्यवीरपशुक्रमैः दिव्यं देव्यग्रतः पानं वीरं वीरासने स्थितम् पशी
यं तु पशोः पानं पापघ्नं शोकमोहघ्नम् उड्डयामरपदुर्गाच असंस्कृतं वृथा
पानं संस्कृतं भैरवः स्वयं चक्रसज्जाविधौ शस्तं सर्वसिद्धिकरं शुभं असंस्कृतं पशोः
पानं कलहोद्वेगकारकम् संस्कृतं सिद्धिजनकं प्रायश्चित्तादिशोधनं मंत्राणां
स्फुरणं तेन महापातकनाशनं आयुः श्रीकांतिसौभाग्यप्रज्ञानं संस्कृतपानतः अ
ष्टैश्वर्यं खेचरत्वं पतनं विधिवर्जनात् अस्य श्रीमहाकालमंत्रस्य महाकालभै
रवऋषिः अनुष्टुप्छंदः महाकालो देवता ह्रौं बीजं क्लीं शक्तिः स्त्रीं कीलकं
अथ मंत्रन्यासः ॐ क्लीं स्त्रीं स्त्रीं अंगुष्ठाभ्यां नमः हूं महाकालाय ह्रौं तर्जनीभ्यां नमः
महादेवाय क्लीं मध्यमाभ्यां कालिकायै अनामिकाभ्यां नमः ह्रौं कनिष्ठकाभ्यां
सर्वसूलं करतलपृष्ठाभ्यां नमः अथ ध्यानं श्मशानस्थो महारुद्रो महाकालो
दिगंबरः कपालकर्त्तरी वामे शूलं खट्वांगं दक्षिणे भुजंगभूषितांगो पि भस्मास्थि
मालमंडितः ज्वलत्पावकमध्यस्थो भस्मशय्याव्यवस्थितः विपरीतरतासक्त
कालिकाहृदयोपरि चर्व्यं खाद्यं च चोष्यं च गीतं नृत्यं च परस्परं अथ मूलं

ॐ क्रीं ह्रीं ह्ल्रीं हूं महाकालाय ह्रौं महादेवाय क्रीं कालिकायै ह्रौं वर्णाः २२
इति श्रीमत्पूर्णानंदपरमहंसविरचिते श्रीश्यामारहस्ये सपर्याक्रमीयः परिच्छेदः
अथ कवचं श्रीभैरव उवाच ॐ कालिकाकवचस्यास्य ऋषिः भैरव उच्यते
छंदोनुष्टुप्समाख्याता देवी दक्षिणकालिका शक्तिर्हां विंशबीजानि विनियोग
स्तु रक्षणे शिरसि नयने भाले भ्रूयुगे कर्णगंडके वदने रोदने जिह्वास्कंधदेशे
गलेषु च भुजद्वय महापार्श्वपृष्ठनाभौ च मेढ्रके कटिपृष्ठोदरे पादे सर्वांगे
मंत्रवर्णकः पूर्णबीजं युगं मायालज्जायुग्मं च बोधनम् पूर्णमायात्र वह्निच वल्ल
भा जीवस्मादिह श्मशाने वादे महाघोरे कविवेशान्यसंग्रहे मंगला सर्वकार्येषु
स्तंभने मोहने तथा मारणोच्चाटने तथा कार्ये निर्विघ्ने प्रजायते यदि वा संकटे निशा
देशमार्गे वा दिदुर्गमे भुंडं तदिति साधनं पुसर्वत्रहरवल्लभे ॐ महाप्रेतासना
पातु शिखां भैरवस्त्रीं सदा मरणं समस्य करस्थामुंडमाला सदावतु अभयं वरदेदे
वि खड्गमुंडी च रक्षतु शवहृदयं तथा कर्णौ घोरदंष्ट्रा सदावतु सुतीक्ष्णपुरमास्य
गुरुसमविघ्नविनाशकः दक्षिणकालिका पातु चंडमुंडविनाशिनी महाका

ला: सदा पातु बीजभूषितमस्तक: एवं कवचं यस्तु कालिकाया पठेन्नरः
मंत्रविन्नर्पयेद्धीमा नास्माद्रोगीमनोगमिमु भूर्जपत्रे सुवर्णे वा रजते वाथ पत्र
के लिखित्वा धारयेद्यस्तु यन्त्रकं चापि मंत्रयुक् तस्य दर्शनमात्रेण वादिनां वि
लयः सदा सर्वं मनोगतं तस्य सिद्ध्यत्येव न संशयः इति कालिकाकवचं समाप्तं
श्रीभैरव्युवाच सर्वं हि कथितं पूर्वं कवचं न प्रकाशितं इदानीं प्रेमभावेन कथ
यस्व ममाग्रतः श्रीभैरव उवाच कालिका कमला काली कालरात्रिस्वरूपिणी
मुंडमालादेहधरा कवरी च प्रियावतु ममगात्राणि विश्वोणि कालिका श्यामनो
हरी शिरो मे पातु चामुंडा कंठं पातु वृषध्वजी हृदयं पातु सा हेशी वै सवीनाभि
मंडले लिंगं मे पातु रक्ताक्षी मध्यं पातु रणप्रिया विशालाक्षी पातु गुह्यं ऊरु
युग्मं तथाम्बिका जानुयुग्मं मुंडमाला गुल्फयुग्मं ललाटिका कमलाशील
पुत्री च कामाप्रमथसज्जिता पादाग्रं तीर्थपादा स्यात् करांगं तीर्थदर्शिनी नी
तिरूपा च तन्मूलं भीमा पातु नदंगुली करस्थलं कराला स्यात्करांगं कामाक्षु पाव
तु मणिबंधं दाधारी करागं शिवदावतु करौ युगलं पायात्सिद्धिधात्री

सदाननं कामधुगावामपार्श्वे दक्षिणांसमशेखरा अट्टहासा च श्रीवांमा स
दा रक्षतु खेचरी दक्षबाहुस्थले पातु देवी विंध्यनिवासिनी कक्षद्वयानं सोमरा
ज्ञी मणिबंधं शिवावतु दक्षहस्ताग्रमन्मूलं मूलाधारनिवासिनी पृष्ठं रक्षतु
गोविंदाऊर्ध्वं रक्षतु हस्तिनी लोलजिह्वा दक्षनेत्रं वामं रक्षतु मानदा दक्षश्रो
त्रं सोमराज्ञी नासायुग्मं भयंकरी ओष्ठाधरं क्षेमकत्री दंतान् रक्षतु त्रैपुरी गं
डं रक्षतु मोगांगी चिबुकं मुंडधारिणी मेरुदंडं ललाटाद्यनीवीरक्षतु कालिका
श्मशाने मे पातु जिह्वा जिह्वाग्रं मनोवत्सला चित्तं रक्षतु कौशांबी वदनं चारु
भूषणा वायुं रक्षतु सोत्कंठा प्राणान् रक्षतु संयमी इदं तु कालिका देव्याः
कवचं सर्वकामदं प्रातःकाले शुचिः भूत्वा मध्याह्ने वा शुचिस्मितः संध्यायां
वा पठेन्मंत्री तस्य राजा वशो भवेत् मंत्रिणं वै ध्रुवं मंत्रं दासवद्यो वरानने पठे
द्वा पाठयेद्वापि भक्तियुक्तः पठेत्सुधीः कवित्वं विपुलां लक्ष्मीं वाग्मी भवति नान्य
था स चिरायुः सुखी पुत्री पुत्रजां भयः पठेत्सदा न च व्याधिः नैव भीतिर्न विवा
दी जितेंद्रियः सर्वान् कामानवाप्नोति कवचस्य प्रसादतः इति श्रीकालिका

कवचं श्रीदक्षिणकालिकाकवचं समाप्तं ॐ कैलासशिखरारूढं भैरवं चंद्रशेखरं
वक्षःस्थलसमासीना भैरवी परिपृच्छति श्रीदेव्युवाच ॐ देवेश परमेशान लोकानु
ग्रहकारक कवचं सूचितं पूर्वं कथयस्व मम प्रभो यदि मे महती प्रीतिस्तवास्ति कु
लभैरव कवचं कालिकादेव्याः कथयस्वानुकंपया श्रीभैरव उवाच अप्रकाश्य
मिदं देवि नरलोके विशेषतः लक्षवारं वारितापि स्त्रीस्वभावात् पृच्छसि श्रीदेव्युवा
च सेवकाबहवो नाथ कुलधर्मपरायणाः यतस्ते भक्तजीवेशः शिवो परि विनोपरि
तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः पृच्छामि बहुधा देव कथयस्व दयानिधे
श्रीभैरव उवाच कथयामि शृणु प्राज्ञे कालिकाकवचं परं गोपनीयं पशोरग्रे स्वयो
नीवपरे यथा सर्वविद्यामहाराज्ञी कालिका कालरूपिणी अस्य श्रीकालिकाक
वचस्य भैरव ऋषिः अनुष्टुप् छंदः अद्वैतरूपिणी कालिका देवता हूं बीजं
ह्रीं शक्तिः क्रीं कीलकं मम सर्वकामार्थसाधनपुरस्सरं मंत्रसिद्ध्यर्थे पाठे विनियोगः
ॐ सहस्रारे महापद्मे कर्पूरधवलो गुरुः वामोरुस्थितगाशक्तिः सदा सर्वत्र रक्षतु
परमाद्यो गुरुः पातु परापरगुरुस्तथा परमेष्ठिगुरुः पातु दिव्यसिद्धश्च मानवः

पुणमा
४७

महादेवीसदापातु महादेवस्तथावतु त्रिपुरोभैरवोपातु दिव्यरूपधरःसदा ब्रह्मा
नंदस्सदापातु मूर्तिदेवःसदावतु चलचित्तःसदापातु चलश्चलश्चपातुमां कुमारः
क्रोधनःचैववरदःस्मरदीपनः मायामायावतीचैवसिद्धेश्वरःपातुमांसदा विमलः
कुशलःचैवभीमसेनःसुधाकरः मीनोगोरक्षकश्चैवभोजदेवःप्रजापतिः मूलदेवो
रतिदेवोविघ्नेश्वरहुताशनौ संतोषःपरमानंदोपातुमांमानवःसदा सर्वेषांनंद
नाथानांज्यायानःपरिकीर्तिताः गणनाथःसदापातुभैरवःपातुमांसदा वटुकोनः
सदापातुदुर्गामांपरिरक्षतु शिरसःपादपर्यंतंपातुमांघोरदक्षिणा तथाशिरसि
मांकालीहृदिमूलेचरक्षतु संपूर्णविद्ययादेवीसदासर्वत्ररक्षतु क्रींक्रींक्रींवदनं
पातुहूंहूंचैवसदावतु ह्रींह्रींपातुस्थलाधारंदक्षिणेकालिकेवतु क्रींक्रींक्रींचहृ
दि सर्वेहूंहूंदक्षवामतोवतु हुंहुंपातुसदास्वाहामूलंसर्वत्ररक्षतु षडंगयुवती
पातुषडंगेषुसदैवमां यंत्रराजःसदापातुऊर्ध्वाधोदेविरक्षतु चक्रराजःसदा
पातुदेवतापरिपातुमां उग्राउग्रप्रभादीमापातुपूर्वेत्रिकोणके नीलाघना
बलाकाचपरतथापरत्रिकोणके मात्रामुद्रामिताचैवतथामध्यत्रिकोणके का

लीकपालिनीकुल्लाकुरुकुल्लाविरोधिनी बहिःषट्कोणगाःपातुविप्रचित्तात
थाग्निये सर्वाःश्यामाःखड्गकराःवामहस्तेनतर्जनी ब्राह्मीपूर्वदलेपातुनारा
यणीतथाग्निके माहेश्वरीदक्षदलेचामुंडाराक्षसेवतु कौमारीपश्चिमेपातुवा
यव्येचापराजिता वाराहीचोत्तरेपातुनारसिंहीशिवेवतु ऐंह्रींअसितांगः पूर्वे
भैरवःपरिरक्षतु ऐंह्रींरुरुश्चाग्निकोणे ऐंह्रींमांचंडस्तुदक्षिणे ऐंह्रींक्रोधोनैर्
तेवतु ऐंह्रींउन्मत्तकस्तथापश्चिमे ऐंह्रींमांपातुकपालीवायुकोणके ऐंह्रीं
भीषणनामाचउत्तरेवतुभैरवः ऐंह्रींसंहारऐशान्यांमातृणांअंगगाःशिवाः
ऐंहेरुवटुकःपूर्वदलेपातुसदैवमाम् ऐंत्रिपुरावटुकश्चैवआग्नेय्यांसर्वदाव
तु ऐंवह्निवेतालोचापिवटुकोदक्षिणेवतु ऐंअग्निजिह्वावटुकस्यावैनैर्ऋत्यांपश्चि
मेतथा ऐंकरालवटुकःपातुऐंकरालवटुकस्तथा ऐंवायव्यांएकपादोउत्त
रेवटुकोवतु ऐंभीमवटुकःपातुऐशान्यांदिशिमांसदा ऐंह्रींश्रींपादुकस्वाहा
बहिश्चमामवरस्सदा ऊर्ध्वाधोदक्षवामाग्रःपृष्ठदेशेषुपातुमां ऐंह्रींश्रींपादु
काव्रमसुरवीपूर्वेमांपरिरक्षतु ऐंकांतिसउरवीआग्निकोणेसदावतु ऐंमां

पु॰मा
४८

ऋगमेघमुखी दक्षिणे मां सदावतु ऐं गौं गौं गजवाजिनैऋत्यां परिरक्षतु ऐं मेमे बि
डालमुखी पश्चिमे पातु मां सदा ऐं सौं स्वाङ्क्षी शशमुखी वायुकोणे सदावतु ऐं ह्लां ह्लं
लंबोदरी मुखी लंबोदर महोदरी पातु मामुत्तरे घोरा ऐं ह्रीं क्लीं शिवकोणके ह्रूं स्वज्ञं
ज्वालाजंघा मलंबोष्ठी सदावतु एताः श्मशानवासिन्यो भीषणा विकृताननाः
पातु मां सर्वदा देव्यः साधकाभीष्टपूर्तिकाः इंद्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निदेव
ता दक्षे यामे सदा पातु नैऋत्यां निऋतिश्च मां वरुणो मां पातु पश्चे वायुः मां वाय
व्येवतु कुबेरश्चोत्तरे पायादैशान्यां तु सदाशिवः ऊर्ध्वं ब्रह्मा सदा पातु अधस्तान
न्तदेवता पूर्वादिषु स्थिताः पातु वज्राद्यास्त्रास्त्रयोगगाः कालिका पातु शिरसि हृ
दये कालिकावतु आधारे कालिका पातु पादयोः कालिकावतु दिक्षु मां कालिका
पातु विदिक्षु कालिकावतु ऊर्ध्वं मे पातु कालिका अधस्तात्कालिकावतु चर्मा
सृङ्मांसमेधास्थि मज्जा शुक्राणि मेवतु इंद्रियाणि मनश्चैव देहसंधिं च मेव
तु शिरसः पादपर्यंतं कालिका मे सदावतु विशंतं कालिका पातु पथि मां कालि
कावतु शयने कालिका पातु सर्वकार्येषु कालिका प्राणान्मे कालिका पातु

दारान्मे कालिकावतु पुत्रान्मे कालिका पातु धान्यं मे पातु कालिका यत्र मे संशया
विद्या सर्वे नश्यंतु शिवाज्ञया इतीदं कवचं देवि त्रैलोक्येषु दुर्लभं तव प्रीत्या
मया ख्यातं गोपनीयं स्वयोनिवत् तव नाम निशम्येते देवि सर्वे यज्ञफलं लभेत्
सर्वे पापाः क्षयं यांति निर्वाण्का सर्वत्र सिद्धाति नानाशास्त्रेषु गुणप्रोक्तं ध्यानं तस्मात् दश
तादिकं तस्मात् शतादिकं मंत्रं कवचं तस्मात् शताधिकं शुचिः समाहितो भूत्वा भक्ति
श्रद्धा समन्वितः संस्थाप्य वामभागे तु शक्तिं स्वां कालिकां प्रियां रक्तवस्त्रसमा
सीनां शिवमंत्रपरां शुभां या शक्तिः सा महादेवी हरत्वं परत्वं साधकः अन्योन्यवि
तनादेवि देवत्वमुपजायते शक्तियुक्तो यजेद्देवी चक्रे वामन सा पिबा भोगैश्च
मधुपर्काद्यैस्तांबूलाद्यैः सुवासितैः इदं रहस्यं परमं परं स्वस्त्ययनं महत् यः
सुधीः पठेद्देवि कवचं देवदुर्लभम् सर्वयज्ञफलं तस्य भवेदेव न संशयः
संग्रामेषु जयेच्छत्रून् शरीरे मम वंजिहि नास्त्राणि तस्य शस्त्राणि शरीरे प्रभवंति
च तस्य व्याधिः कदाचिन्न दुःखं नास्ति कदाचन गतिः सर्वत्र तस्यैव वायुः तु
ल्यस्सदा भवेत् दीर्घायुः कामभोगी शोगुरुभक्तो भवेत्सदा अहो कवचमा

श्यामा
५९

ह्रांक्ष्य पठमानस्य नित्यशः विनापि योगचर्येण योगिनां समतां व्रजेत् भूर्जे त्व
चि समालिख्य चक्रं तत्र विनिर्मितं मध्ये त्रिकोणे संलिख्य साध्यसाधकयोः लि
खेत् उद्धरेन्मूलमंत्रं तु बाह्ये आवर्णे निवेष्टयेत् कुंकुमिश्रेण चंद्रेण चंदनाम्भा
वसुंदरि एतद्यंत्रं महेशानि सुरासुरसुदुर्लभम् गोरोचनाकुंकुमेन तद्बाह्ये
कवचं लिखेत् श्वेतसूत्रेण संवेष्ट्य लाक्षया परिमंडयेत् पंचामृतैः पंचगव्यैः
स्नापयित्वा शुभे हनि संपूज्य देवतारूपां गुटिकां सर्वकामदां प्राणप्रतिष्ठामं
त्रेण प्राणांस्तु विनियोजयेत् अनयैव विधिना तोयधात्वान्तसंस्थापयेद्बुधः एषा तु
गुटिका देवि कंठे लग्नाखिलप्रदा शीर्षे वश्यकरी देवि नाभौ स्तंभनकारिणी ब
द्धा वामभुजे ह्येषा वैरिपक्षक्षयंकरी जठरे रोगदमनी पुत्रदा राहुदक्षिणा
विद्याकरी ललाटस्था शिरस्था यां तु यशःप्रदा सर्वकामप्रदा देवि सर्वरोगक्षयं
करी दक्षिणे बाहुमूले पि यदि तिष्ठति सर्वदा तदा सर्वार्थसिद्धिः स्याद्यस्म
न सि वर्तते दुर्दंतु कवचस्यास्य पठनाद्धारणात्प्रिये सर्वान्कामानवाप्नोति स
वस्त्रेहा प्रकाशितं गुरोः पादप्रसादेन सद्विद्यां लभते यदि तथापि कवचं दे

वि त्रिषु लोकेषु दुर्लभं स च देवो हरः साक्षात् तत्पत्नी परमेश्वरी यस्य भक्तिः गुरौ नि
त्यं वर्तते देववल्लभे तदा मंत्रस्य यंत्रस्य सिद्धिः भवति नान्यथा कवचस्य तथा
सिद्धिः गुटिकायाश्च सुंदरि अज्ञात्वा कवचं देवि न लभ्या गुरुपादुकां इहलोके
दुःखी भूत्वा परे च नरकं व्रजेत् सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः न प्र
कुतोमि प्रभावं तु कवचस्यास्य वर्णितं यस्मै कस्मै न दातव्यं कवचं शंभुदुर्लभं
न देयं परशिष्येभ्यः कृपणेभ्यः च सुंदरि शिष्याय भक्तिहीनाय चुंबकाय तथैव
च गुरुभक्तिविहीनाय परदाररताय च निंदकाय कुशीलाय दांभिकाय च सुं
दरि यो ददाति निषिद्धेभ्यः कवचं मम मुखोदितं चत्वारि तस्य नश्यंति आयुर्विद्या
यशोबलं देयं शिष्याय शांताय गुरुभक्तिपराय च सर्वलक्षणसंपन्नतंत्रमंत्र
युताय च ८० इति श्रीरुद्रयामले उत्तरखंडे कालीप्रस्तावे कालीभैरवसंवादे दक्षि
णाकालिकाकवचं समाप्तम् अथ विपरीतोक्तकवचं नमामि गुरुं भक्ताभयमंत्र
शक्तिसमन्वितं प्रसन्नं ज्ञानविज्ञानहेतुं बुद्धिप्रकाशकं गणेशं वदनं मौलिर
त्नं विघ्नविदारकं पाशांकुशवराभीतिलसद्भुजचतुष्टयं भैरवः सर्वदा पातु

पुपामा
५०

ऋषिः मे शिरसोपरि छंदः सदा पातु त्रिष्टुप् विनियात्मकं गुणत्रयमयी शक्तिः पर
शक्तिः तुरीयका ब्रह्मस्वरूपिणी पातु हृदये मम कालिका बीजस्वरूपिणी पा
तु ह्रींकारी शक्तिरूपिणी हूं शक्तिः सर्वदा पातु सर्वे रक्षास्वरूपिणी महाकालः
सदा पातु महाभीमपराक्रमः ददातु मम कामानि सर्वसिद्धीश्वरो विभुः आदित
कारपर्यंता हृदये मम मातृका एवं तु डादिठांता च रक्षतु बाहुयुग्मके ढमध्य
मात्रावर्णमादिदांताः तथैव च सविंदवः सदा पातु जंघयोरुभयोः मम धनमेत
पिशाचाद्या विघ्नदेवः तथा पुनः ष्ट्यम्भावाः समधातुवर्णा रक्षंतु मां सदा स
र्वेषु रोमकूपेषु मर्मस्थानेषु संधिषु नाडीषु पातु विकारेषु रक्षंतु मम मातृका
शक्तिराधाररूपाया पातु मां मेढ्रमेव तु अंसस्थः सर्वदा पातु सर्वदेवमयः स्वयं
फणगमावलिः पातु समुद्राः पांतु मां सदा रत्नद्वीपः सदा पातु रक्षंतु कल्पपाद
पाः श्मशानपीठकः पातु पातु मां मणिवेदिका सदाशिवमहाप्रेतासनामां
परिरक्षतु द्वारदेशे द्वारपाला योगिन्याः पातु मां सदा सिद्धयोष्टौ सदा पातु
पूर्वादिवसुदिग्गताः कालीकपालिनी कुल्ला कुरुकुल्ला तथैव च विरोधिनी

विप्रचित्तां नमामि सर्वसिद्धये एतास्तु सर्वयोगिन्या बहिः षट्कोणके स्थिताः रक्षंतु
मां सदा देव्या मातरो भक्तवत्सलाः उग्रा उग्रप्रभा दीप्ता नमाम्यहं विघ्नशये सर्वसि
द्धिप्रयच्छंतु पातु मां पुत्रवत्सदा नीला घना बलाका च प्रणमामि समुत्सुकः
सर्वविघ्नापनुत्त्यर्थं रक्षंतु कल्पपाणिव तु मात्रा मुद्रा मिता नां च नमामि चरणंबु
ज्ञं देवी प्रेमसखीनां च शरण्या मिसिद्धये एताः पंचदशकोणे एकैका वरदा सदा
तर्जनी वामहस्तेन खड्गं दक्षिणके तथा मुंडमालाधराः शीर्षे नीलांजनचयोपमाः
शत्रुहानिप्रियावंडा पातु मां कालिकाप्रिया बहिः पद्मदलाग्रेषु ब्रह्माद्याश्चैव मात
रः रक्षंतु मे प्रयच्छंतु सिद्धिं देव्यो दयान्विताः ब्रह्माणी पातु मां पूर्वे सर्वकामवर
प्रदा वह्नौ नारायणी पातु सर्वकामार्थसिद्धिदा माहेश्वरी दक्षिणे पातु सर्वमंगल
कारिणी चामुंडा नैरृते पातु सर्वशत्रुप्रमर्दिनी कौमारी पश्चिमे पातु शक्तिहस्ता
रिसूदिनी अपराजिता च वायव्यां पातु मां तु यदा शुभा उत्तरे पातु वाराही वरदा
बोधभाविणी नारसिंही सदा पातु ऐशान्यां भयनाशिनी एतास्तु परविद्यायाः श
क्तयः श्चाष्टदेवताः ब्रह्मविष्णुशिवादीनां तेजःपुंजोद्भवाः परां स्वर्यैद्धवक्षिपी

६६
पुपामा

श्यामा
५२

ॐ नवैदवीं परमेश्वरीम् । नमामि दक्षिणां मातः कालिकां परमेश्वरीम् । शिवाजन
चयप्रख्यां प्रवीणशवसंस्थितां । गलच्छोणितधाराभिः स्मेराननसरोरुहां । पीनो
न्नतकुचद्वंद्वां पीनवक्षोनितंबिनीं । दक्षिणांमुक्तकेशांगीं दिगंबरविनोदिनीं । महा
कालशवाविष्टस्मेराननेदोपरिस्थितां । सुखसांद्रस्मितामोदमोदिनीं मदविह्वलां
आरक्तमुखवक्त्रां नामिनेत्रालीभिर्विराजितां । शवद्वंद्वकृतोत्तंसां सिंदूरतिलकोज्ज्व
लां । पंचाशन्मुंडघटितमालांलोहितलोचनां । नानामणिविशोभाढ्यां नानालंकार
भूषितां । शवास्थिकृतकेयूरशंखकंकणमंडितां । शववक्षसमारूढां लेलिहानां
शवं तु वित् । शवमांसकृतग्रासां साट्टहासां मुहुर्मुहुः । खड्गमुंडधरां वामे सव्येभय
वरप्रदां । दंतुरां च महारौद्रीं चंडनादातिभीषणां । शवाभिः घोररूपाभिः वेष्टितां
भयदर्शिनीं । मा भैः मा भैः स्वभक्तेषु कृतं स्मेरा घोरशिः स्वनां । स्वयं किं ब्रूथ किं ब्रूथ
वदन्तीति प्रभाषिणीं । त्वं गतिः शरणं देवि त्वं मातः परमेश्वरि । पाहि मां करुणा
सांद्रे नमस्ते परमेश्वरि । नमस्ते कालिके देवि नमस्ते भक्तवत्सले । मूर्खं मां हर
मे देवि प्रतिभाजयदां शिवे । गद्यपद्यमयीं वाणीं तर्कव्याकरणादिकां । अन

धीतगतां विद्यां देहि दक्षिणकालिके । जयं देहि सभामध्ये धनं देहि धनागमे । देहि मे
चिरजीवित्वं कालिके रक्ष दक्षिणे । राज्यं देहि यशो देहि पुत्रान् दारान् धनं तथा । देहां
ते देहि मे मुक्तिं जगन्मातर्नमोऽस्तु ते । मंगला भैरवी दुर्गा कालिका त्रिदशेश्वरी । उ
मा हैमवती कन्या कल्याणी भैरवेश्वरी । काली ब्राह्मी च माहेशी कौमारी मधुसूद
नी वाराही वासवी चंडी जम्भुः वैशुनयः सदा । उग्रतारे तितारे ति शिवेत्येवं हरे
ति च । लोकोत्तरेति कालेति गीयते कृतिभिः सदा । यथा काली तथा तारा तथा
छिन्ना च कुल्लुका । एकमूर्तिः चतुर्भेदा देवि त्वं कालिका परा । एकद्वित्रिविधा
देवि कोटिधानंतरूपिणी । अनंतैर्बहुभिर्भेदैः कालिकेति प्रगीयते । शंभुः पंचमु
खेनैव गुणान्वक्तुं न ते क्षमः । वाक्कुंठेन नरः किं तं सर्वं च समस्तवरसमेव । प्राणान्रक्ष
यशो रक्ष पुत्रदाराधनं सदा । सर्वकाले सर्वदेशे पाहि दक्षिणकालिके । यः संपू
ज्य पठेन्नूनं रात्रौ दिवा वा संध्ययोस्तथा । स वाप्य महतीं लक्ष्मीं सर्वकामांस्ततो ल
भेत् । इति श्रीविश्वसारतंत्रे विरचितं कालिकाकवचं समाप्तं । तथा च भैरवतंत्रोक्तं
कवचं । श्रीभैरव उवाच । ॐ काली पूज्या श्रुता गीता यमा वा स्वविविधा

प्रपामा
५२

प्रभो इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं त्वमेव कारणानाथ त्राहि मां दुःखसंक
टात् सर्वदुःखप्रशमनं सर्वपापप्रणाशनम् सर्वसिद्धिप्रदं पुण्यं कवचं परमाद्भुतं
त्वत्तो वै श्रोतुमिच्छामि वद मे करुणानिधे श्रीभैरव उवाच रहस्यं शृणु वक्ष्यामि भैर
वि प्राणवल्लभे श्रीजगन्मंगलं नाम कवचं मंत्रविग्रहं पठित्वा धारयित्वा च त्रैलोक्यं
मोहयेत्क्षणात् नारायणोपि यद्धृत्वा नारी भूत्वा महेश्वरम् योगीशं क्षोभमनयद्य
द्धृत्वा च रघूद्वहः वरदृप्तान् जघानैव रावणादिनिशाचरान् यस्य प्रसादादीशोहं त्रै
लोक्यविजयी प्रभुः धनाधिपः कुबेरोपि सुरेशोभूच्छचीपतिः एवं च सकला देवाः सर्व
सिद्धीश्वराः प्रिये श्रीजगन्मंगलस्यास्य कवचस्य ऋषिः शिवः छंदोनुष्टुब् देवता च
कालिका दक्षिणेरिता जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु योषिदाकर्षणे चैव
विनियोगः प्रकीर्तितः ॐ शिरो मे कालिका पातु क्रींकारैकाक्षरी परा क्रीं क्रीं क्रीं मे ल
लाटं च कालिका खड्गधारिणी हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम दक्षिणे का
लिके पातु घ्राणयुग्मं महेश्वरी क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं सकलं वद
नं पातु ह्रीं ह्रीं स्वाहास्वरूपिणी द्वाविंशत्यक्षरी स्कंधौ महाविद्या सुखप्रदा खड्ग

मुंडधरा काली सर्वांगमभितोवतु क्रीं ह्रीं हूं त्र्यक्षरी पातु चामुंडा हृदयं मम ऐं हूं ॐ
ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थले अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका
क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेवतु
क्रीं क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी ह्रीं क्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयं
काली दशाक्षरी विद्या स्वाहांते चोरुयुग्मकं ॐ ह्रीं क्रीं स्वाहा मे पातु जानुनी कालिका सदा
काली हृन्नामविद्येयं चतुर्वर्गफलप्रदा क्रीं ह्रीं ह्रीं पातु सा गुल्फौ दक्षिणे कालिकेवतु
क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम खड्गमुंडधरा काली वरदाभयधारिणी
विद्याभिः सकलाभिः सा सर्वांगमभितोवतु काली कपालिनी कुल्ला कुरुकुल्ला विरोधि
नी विप्रचित्ता ह्युग्रोग्रा च प्रभा दीप्ता घनत्विषः नीला घना बलाका च मात्रा मुद्रा मि
ता च मां एताः सर्वाः खड्गकरा मुंडमालाविभूषणाः रक्षंतु ह्यायुधैर्दिक्षु ब्राह्मी नारा
यणी तथा माहेश्वरी च चामुंडा कौमारी चापराजिता वाराही नारसिंही च सर्वाश्चायु
धभूषणाः रक्षंतु ह्यायुधैर्दिक्षु मां विदिक्षु यथा तथा इति ते कथितं दिव्यं कवचं
परमाद्भुतं श्रीजगन्मंगलं नाम महामंत्रौघविग्रहं त्रैलोक्याकर्षणं ब्रह्मकव

प्रपामा
५३

चं मन्मुखोदितम् गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः कवचं त्रिः सकृद्वापि या
वज्ज्ञानं च वा पुनः एतच्छतार्धमावृत्य त्रैलोक्यविजयी भवेत् त्रैलोक्यं क्षोभयत्ये
व कवचस्य प्रसादतः महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत् पुष्पाञ्जलिं का
लिकायै मूलेनैव पठेत्सकृत् शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् भूर्जे
विलिखितं चैतत्स्वर्णस्थं धारयेद्यदि शिखायां दक्षिणे बाहौ कण्ठे वा धारणाद्बुधः
त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात् पुत्रवान्धनवान्श्रीमान्नानाविद्या
निधिर्भवेत् ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः नाशमायान्ति सर्वत्र कव
चस्यास्य कीर्तनात् मृतवत्सा च या नारी वन्ध्या वा मृतपुत्रिणी कण्ठे वा वामबाहौ
वा कवचस्यास्य धारणात् बहुपत्या जीववत्सा भवत्येव न संशयः न देयं परशिष्ये
भ्योऽभक्तेभ्योपि विशेषतः शिष्येभ्यो भक्तियुक्तेभ्यः चान्यथा मृत्युमाप्नुयात् स्पर्धाम्
द्धूय कमला वाग्देवी मन्दिरे सुखे पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितं इदं
कवचमज्ञात्वा यो जपेत्कालिदक्षिणां शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्ध्यति
सशस्त्रघातमाप्नोति सोचिरान्मृत्युमाप्नुयात् जपेदादौ जपेदन्ते सप्तवाराणि

वुक्रमात् नोध्यस्य यत्र कुत्रापि गोपनीयं प्रयत्नतः लिखित्वा स्वर्णपात्रे वैष्ठ्रा
काले तु साधकः मूर्ध्नि धार्यं प्रयत्नेन विचार्य तत्प्रपूजयेत् इति श्री भैरवतन्त्रे का
लीकल्पे कालिकाकवचं समाप्तम् एतस्मिन्नेव काले तु भृगुरामस्य पार्वती कार्ति
वीर्यसुतास्सर्वे पितरं च देहदाणात् नद्धृत्वा रेणुकावाक्यं जमदग्नेः विनाशनं
वक्रेष्ठभृगुः च रामस्य कालान्तकयमोपमं हैदेयरश्मुमादाय अतीवसुमनोहरं
पितुः शापोर्चितं हत्वा ब्रह्म सजगतितले ततः कैलासमगमद्रामपरशुना स
ह तं दृष्ट्वा साधकं श्रेष्ठं शिवो वचनमब्रवीत् आगतोसि किमर्थं त्वं कथयामा
स तत्त्वतः तस्य तद्वचनं श्रुत्वा रोषात्तु स्फुरितलोचनं कथयामास तत्सर्वं पितुः
शापोर्चितं क्रियां तदा मनसि संज्ञाय कलिकालविनाशिनी भृगुरामाय तां वि
द्यां ददौ तस्मिन्सदाशिवः कथयामास कवचं त्रैलोक्यं तत्करं शुभं यदा नाम
सहस्रेषु कथयामास तत्त्वतः तत्कालस्थाया पुरा प्रोक्तं स्वयं नाम सहस्रकं
तत्सर्वं भृगुरामाय कथयामास शङ्करः आराध्य दक्षिणां कालीं रामः परशुना
सह पितुः शोकान्तदा देवी निःक्षत्रामकरोत्स्वयं त्रिःसप्तकृत्वा बहुधा निःक्षत्रा

श्यामा
५५

सर्वरोग्मद्गृही स्पमंत्रंपंचवक्त्रेदत्तेत्रेशोणितेनोदानंदंततः शनैःमांसैःतदाकालीतर्प
यामासतत्त्वतः तदाभवत्संतुष्टादेवीदानवनाशिनी श्रीशिवउवाच कथितो
यंमहामंत्रःसर्वमंत्रोत्तमोत्तमः यामासाद्यमयाप्राप्तंमैश्वर्यंपदमुत्तमं संयुक्तः
परयाभक्त्यायथोक्तविधिनाभवान् कुरुतामर्चनंदेव्यास्त्रैलोक्यविजिगीषया
श्रीरामउवाच (कथितोयंमहामंत्रःसर्वमंत्रोत्तमोत्तमः) प्रसन्नोयदिमेदेवपर
मेशपुरशासन रहस्यंपरयादेव्याःकृपयाकथयप्रभो विनार्चनंविनाहोमंविना
न्यासंविनाबलिं विनागंधंविनापुष्पंविनानित्यविशोधनं विनाजपंविनादानं
यथाकालीप्रसीदति श्रीशिवउवाच पृष्टंत्वयोत्तमंप्राज्ञभृगुवंशसमुद्भव
भक्तानामपिभक्तोसित्वमेवसाधयिष्यसि देवीदानवकोटिघ्नीलीलयारुधिर
प्रियां सदास्तोत्रप्रियासुश्रीकामकौतुकलालसां सर्वदानंदहृदयामासवा
सक्तमानसां माध्वीकमत्स्यमांसादुरागिणींवैष्णवीपरां श्मशानवासिनीप्रेत
गणनृत्यमहोत्सवां योगप्रभांयोगिनेशीं योगींद्रहृदयस्थितां तामुग्रकालि
कांरामप्रसादयितुमर्हसि तस्याःस्तोत्रंमहापुण्यंस्वयंकाल्याप्रकाशितं

तवतत्कथयिष्यामिश्रुत्वावत्सावधारय गोपनीयंप्रयत्नेनपठनीयंपरात्प
रम् यस्यैककालपठनात्सर्वेविघ्नाःसमाकुलाः नश्यंतिदहनेदीप्तेपतंगा
इवसर्वतः निशीथेमुक्तकेशस्तुनग्नःशक्तिसमन्वितः मनसाचिंतयेत्काली
महाकालेनलालितां पठेत्सहस्रनामाख्यंस्तोत्रंमोक्षस्यसाधनं प्रसन्नाका
लिकातस्यपुत्रत्वेनानुकंपते यथाब्रह्मामृतैर्ब्रह्मकुसुमैःपूजितापरा
प्रसीदतितथातेनस्तुताकालीप्रसीदति अस्यश्रीदक्षिणकालिकासह
स्रनामस्तोत्रस्य महाकालभैरवऋषिः अनुष्टुप्छंदः श्मशानकालि
कादेवता धर्मार्थकाममोक्षार्थेपाठेविनियोगः श्मशानकालिकाकाली
भद्रकालीकपालिनी गुह्यकालीमहाकालीकुरुकुल्लाविरोधिनी कालिका
कालरात्रिश्चमहाकालनितंबिनी कालभैरवभार्याचकुलवर्त्मप्रकाशिनी का
मदाकामिनीकाम्याकामनीयस्वभाविनी कस्तूरीरसलीलांगीकुंजरेश्वरग
गामिनी ककारवर्णसर्वांगीकामिनीकामसुंदरी कामार्ताकामरूपाच
कामधेनुःकलावती कांताकामस्वरूपाचकामाख्याकुलपालिनी कु

श्यामा
५५

लिनाकुलवत्पंचादुर्गादुर्गविनाशिनी कौमारीकुलजाकृष्णाकृष्णदेहाकृशोदरी
कृशांगीकुलिशांगी च क्रींकारीकमलाकला करालास्याकरालीचकुलकांतापरा
जिता उग्राघोग्रनरादीप्ताविप्रचित्तामहामना नीलाघनामेघनादा महामुद्रा
मितासिता ब्राह्मीनारायणीभद्रासुभद्राभक्तवत्सला माहेश्वरीचचामुंडावारा
हीनारसिंहिका वज्रांगीवज्रकंकालीनृमुंडास्रग्विणीशिवा मालिनीनरमुंडा
लीगलद्रक्तविभूषणा रक्तचंदनसिक्तांगीसिंदूरारुणमस्तका घोररूपाघोर
दंष्ट्राघोराघोरतराशुभा महादंष्ट्रामहामायासुदतीयुगदंतुरा सुलोचनावि
रूपाक्षीविशालाक्षीत्रिलोचना शारदेंदुप्रसन्नास्यास्फुरत्स्मेरांबुजेक्षणा अट्ट
हासप्रसन्नास्यास्मेरवक्त्रासुभाषिणी प्रसन्नपद्मवदनास्मितास्याप्रियभाषिणी
कोटराक्षीकुलश्रेष्ठामहतीबहुभाषिणी सुमतिःकुमतिश्चंडाचंडमार्गातिवेगि
नी प्रचंडाचंडिकाचंडीचर्चिकाचंडवेगिनी सुकेशीमुक्तकेशीचदीर्घकेशीम
हाकचा प्रेतदेहकर्णपूराप्रेतपाणिसुमेखला ३० प्रेतासनाप्रियप्रेताप्रे
ताभूमिकृतालया श्मशानवासिनीपुण्यापुण्यदाकुलपंडिता पुण्यालया

पुण्यदेहापुण्यश्लोकाचपाविनी पूतापवित्रापरमापरापुण्यविभूषणा पुण्यनाम्नी
भीतिहरावरदाखड्गपालिनी नृमुंडहस्ताशस्त्राछिन्नमस्तासुनासिका दक्षिणा
श्यामलाश्यामाशांतापीनोन्नतस्तनी दिगंबराघोररावासृक्कांतारक्तवाहिनी घोररा
वाशिवासंगाविसंगीमदनातुरा मत्तामत्ताप्रमदासुधासिंधुनिवासिनी अतिमत्ता
महामत्तासर्वाकर्षणकारिणी गीतप्रियावाद्यरताप्रेतनृत्यपरायणा चतुर्भुजाद
शभुजाअष्टादशभुजातथा कात्यायनीजगन्माताजगतीपरमेश्वरी जगद्बंधुर्ज
गद्धात्रीजगदानंदकारिणी जगज्जीवमयीहैमवतीमायामहामयी नागयज्ञोप
वीतांगीनागिनीनागशायिनी नागकन्याकुरंगाक्षीगांधारीकिन्नरेश्वरी मोहरात्रि
र्महारात्रिर्दारुणाभासुरासुरी विद्याधरीवसुमतीयक्षिणीयोगिनीजरा राक्षसी
डाकिनीवेदमयीवेदविभूषणा श्रुतिःस्मृतिर्महाविद्यागुह्यविद्यापुरातनी चिंत्या
चिंत्यासुधास्वाहानिद्रातंद्राचपार्वती ४० अपर्णानिश्चलालोलासर्वविद्यातप
स्विनी गंगाकाशीशचीसीतासतीसत्यपरायणा नीतिस्सुनीतिस्सुरुचिस्तुष्टिपुष्टि
धृतिक्षमा वाणीबुद्धिःमहालक्ष्मीःलक्ष्मीनीलसरस्वती स्रोतस्वतीसरस्वतीम
तंगीविजयाजया नदीसिंधुसर्वमयीतारा शून्यनिवासिनी शुद्धातरंगिणीमे

कृपामा
५६

धाडाकिनीबटुकरूपिणी स्थूलास्थूलस्मासूक्ष्मतराभगवत्यनुरूपिणी परमाणुस्वरू
पाचचिदानंदस्वरूपिणी सदानंदमयीसत्यसदानंदस्वरूपिणी सुनंदनंदिनी
स्तुत्यास्तवनीयस्वरूपिणी रंकिनीटंकिनीचित्राविचित्राचित्ररूपिणी पद्मापद्मा
लयापद्ममुखीपद्मविभूषणा हाकिनीशाकिनीशांतारादाकिणीरुधिरप्रिया भ्रांतिः
भवानीरुद्राणीमृडानीशत्रुमर्दिनी उपेंद्राणीमहेशानीज्योत्स्नाचंद्ररूपिणी सू
र्यात्मिकारुद्रपत्नीरौद्रीस्त्रीप्रकृतिःपुमान् शक्तिःसूक्तिःमतिमतीभुक्तिःमुक्तिःपति
व्रता सर्वेश्वरीसर्वमाताशर्वाणीहरवल्लभा सर्वज्ञासर्वदासिद्धाभव्याभाव्याभया
पहा कर्त्रीयंत्रीपालयंत्रीशर्वरीतामसीदयी तमिस्रातामसीस्थाणुःस्थिराधीरा
तपस्विनी चार्वंगीचंचलालोलजिह्वाचारुचरित्रिणी त्रपात्रपावतीलज्जाविल
ज्जाह्रीरजोवती सरस्वतीधर्मनिष्ठाश्रेष्ठानिष्ठुरनादिनी गरिष्ठादुष्टसंहर्त्रीवि
शिष्टाश्रेयसीघृणा भीमाभयानकाभीमनादिनीभीःप्रभावती वागीश्वरीश्री
र्यमुनायज्ञकर्त्रीयजुःप्रिया ऋक्सामाथर्वनिलयारागिणीशोभनास्वना
कलकंठीकंबुकंठीवीणावीणपरायणा वंशिनीवैष्णवीस्वच्छाधरित्रीजगदी

श्वरी मधुमतीकुंडलिनीऋद्धिःसिद्धिःशुचिःस्मिता रंभोर्वशीरतीरामारोहिणीरे
वतीमखा शंखिनीचक्रिणीकृष्णागदिनीपद्मिनीतथा शूलिनीपरिघास्त्राचपा
शिनीशार्ङ्गपाणिनी पिनाकधारिणीधूम्राशरभीवनमालिनी रथिनीसमरप्रेमा
वेगिनीरणपंडिता जटिनीवज्रिणीनीलालावण्यबुद्धिचंडिका बलिप्रियासदा
पूज्यापूर्णादैत्येंद्रमाथिनी महिषासुरसंहर्त्रीवशिनीरक्तदंतिका रक्तपारुधि
रक्तांगीरक्तखर्परहस्तिनी रक्तप्रियामांसरुचिरासवासक्तमानसा गलच्छोणित
मुंडालीमुंडमालाविभूषणा शवासनाचितांतस्थामाहेशीवृषवाहनी व्या
घ्रत्वगंबराचीनचेलिनीसिंहवाहिनी वामदेवीमहादेवीगौरीसर्वज्ञभाविनी
बालिकातरुणीवृद्धावृद्धमाताजरातुरा सुभ्रूविलासिनीब्रह्मवादिनीब्राह्मणी
मही स्वप्नावतीचित्रलेखालोपामुद्रासुरेश्वरी अमोघारुंधतीतीक्ष्णाभोगव
त्यनुरागिनी मंदाकिनीमंदहासाज्वालामुख्यसुरांतका मानदामानिनीमा
न्यामाननीयामदोद्धुरा मदिरामेदुरोन्मादामेध्यासाध्याप्रसादिनी सुम
ध्यानंतगुणिनीसर्वलोकोत्तमोत्तमा जयदाजित्वराजैत्रीजयश्रीजयशालि

नी सुखदा शुभदा सत्या सभा संक्षोभकारिणी शिवदूती भूतमतिर्विभूतिर्भीषणा
नना कौमारी कुलजा कुंती कुलस्त्री कुलपालिका कीर्त्तिर्यशस्विनी भूषा भव्या भूत
पतिप्रिया सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता धनिष्ठा धनदा धन्या वसु
धा स्वप्रकाशिनी गुर्वी गुर्वी गुरुः श्रेष्ठा सद्गुणा त्रिगुणात्मिका महाकुलीना निष्का
मा सकामा कामजीविनी कामदेवकला रामाभिरामा शिवनर्त्तकी चिंतामणिः क
ल्पलता जाग्रती दीनवत्सला कीर्त्तिकी कृत्तिका कृत्या अयोध्या विषमा समा
सुमंत्रा मंत्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी त्रैलोक्यजननी हृष्टा निर्मांसा काल
रूपिणी तडाकर्त्तिनजठरा शुष्कमांसास्थिमालिनी अवंती मथुरा हृद्या त्रै
लोक्यपावनीश्वरी व्यक्ताव्यक्तानेकमूर्त्तिः शर्वरी भीमनादिनी क्षेमंकरी
शंकरी च सर्वसंमोहकारिणी ऊर्द्धतेजस्विनी क्लिन्ना महातेजस्विनी तथा अ
द्वैता भाविनी सद्रूपा सुरभी सर्वमंगला सर्वप्रियंकरी भोग्या धरणी पिशिता
शना भयंकरी पापहरा निष्कलंका वशंकरी आशा तृष्णा चंद्रकला तंत्राणी वा
युवेगिनी सहस्रसूर्यसंकाशा चंद्रकोटिसमप्रभा वह्निमंडलमध्यस्था स

र्वसत्त्वप्रतिष्ठिता सर्वाचारवती सर्वदेवकन्याधिदेवता दक्षकन्या दक्षयज्ञना
शिनी दुर्गतारिणी इज्या पूज्या विभीः भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी रंभोरूर्नीलग्री
वा च जयंती वरुणा कुहूः मनस्विनी देवमाता यशस्या ब्रह्मचारिणी सिद्धिदा वृ
द्धिदा वृद्धिः सर्वाद्या सर्वदायिनी आगमरूपिणी ध्येया मूलाधारनिवासिनी आ
ज्ञा प्रज्ञा पूर्णमना चंद्रमध्यनुरूपिणी वदुकाग्निर्नाभिस्था सत्वसंघाट्टठब्रह्मा
अदितिर्दितिकी दंडनी निस्त्रयी त्रिदिवसुंदरी ज्वलिनी ज्वालिनी शैलतनया विंध्य
वासिनी प्रत्यया खेचरी धैर्या तुरीया विमला तुरा प्रगल्भा वारुणी छाया वशि
नी विस्फुलिंगिनी भुक्तिसिद्धिः सदा प्राप्तिः प्राकाम्या महिमा णिमा इच्छासिद्धि
र्वशित्वा च ईशित्वोर्द्धनिवासिनी लघिमा चैव गायत्री सावित्री भुवनेश्वरी मनोह
रा चिता दिव्या देवदारा मनोहरा पिंगला कमला जिह्वा रसज्ञा रसिका रसा सु
षुम्नेडा योगवती गांधारी नरकांतिका पांचाली रुक्मिणी राधा राध्या भीमा धि
कारिका अमृता तुलसी हृद्या कैटभी कपटेश्वरी उग्रचंडेश्वरी वीरजननी वीर
सुंदरी उग्रतारा यशोदाख्या देवकी देवमानिता निरंजना चित्रा देवी क्रोधि

नीकुलदीपिका कुलवागेश्वरी ज्वालामातृका द्राविणी द्रवा योगेश्वरी महा
मारी भ्रामरी बिंदुरूपिणी दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा कुब्जिकाज्ञा
निनी ज्येष्ठा भुशुंडी प्रकटाकृतिः द्राविणी गोपनी माया कामबीजेश्वरी क्रिया शा
कंभरी कोकनदा सुसत्यालास्यातिलोत्तमा अमेया विक्रमा क्रूरा संपत्शीला त्रिवि
क्रमा स्वस्तिर्हव्यवहा प्रीतिरूष्मा धूम्रार्चिरंगदा तपिनी तापिनी विश्वा भोगदा
भोगधारिणी त्रिखंडा बोधिनी वश्या सकला शब्दरूपिणी बीजरूपा महामुद्रा व
शिनी योगरूपिणी अनंगमदना अनंगरेखा नंगांकुशेश्वरी १०० अनंगमालि
नी कामेश्वरी सर्वार्थसाधिका सर्वमंत्रमयी मोदिन्यरूपानंतरूपिणी वज्रेश्वरी
वज्रयिनी सर्वद्वंद्वक्षयंकरी षडंगयोगयुवती युक्ताज्वालांशुमालिनी दुरा
शया दुराधारा दुर्जया दुर्गरूपिणी दुरंता दुष्कृतिःहारा दुर्ध्येया दुरतिक्रमा
हंसेश्वरी त्रिकोणस्था शाकंबर्यनुकंपिनी त्रिकोणनिलया नित्या परमामृतरंजि
ता महाविद्येश्वरी श्वेता भीरुंडा कुलसुंदरी त्वरिता भक्तसंयुक्ता भक्तवश्या सना
तनी भक्तानंदमयी भक्तभाविता भक्तशंकरी सर्वसौंदर्यनिलया सर्वसौभाग्य

शालिनी सर्वसंभोगभवना सर्वसौख्यनिरूपिणी कुमारीपूजनरता कुमारीव्रत
चारिणी कुमारीभक्तिसुखिनी कुमारीरूपधारिणी कुमारीपूजकप्रीता कुमारीप्री
तिदा प्रिया कुमारीसेवकासंगा कुमारीसेवकालया आनंदभैरवी बालभैरवी
वटुकभैरवी श्मशानभैरवी कालभैरवी पुरभैरवी महाभैरवपत्नी च परमा
नंदभैरवी सुरानंदाभैरवी च उन्मदानंदभैरवी तथायस्तु कौलभैरवी ज्ञानानं
दसुभैरवी महाभयंकरी तीव्रा तीव्रवेगा तरस्विनी त्रिपुरा परमेशानी सुंदरी
पुरसुंदरी त्रिपुरेशा पंचदशी पंचमी पुरवासिनी महासप्तदशी चैव षोडशी
त्रिपुरेश्वरी महांकुशस्वरूपा च महाचक्रेश्वरी तथा नवचक्रेश्वरी चक्रेश्वरी त्रि
पुरमालिनी राजराजेश्वरी धीरा महात्रिपुरसुंदरी सिंदूरपूररुचिरा श्रीमत्त्रि
पुरसुंदरी सर्वांगसुंदरी रक्तारक्तवस्त्रोत्तरायिणी यवयावकसिंदूररक्तचं
दनरूपधृक् यवायावकसिंदूररक्तचंदनधारिणी चमरीवालकुटिलनि
र्मलाश्यामकेशिनी वज्रमौक्तिकरत्नाढ्या किरीटमुकुटोज्ज्वला रत्नकुंडल
संयुक्तास्फुरद्गंडमनोरमा कुंजरेश्वरकुंभोत्थमुक्तारंजितनासिका मुक्तावि

द्रुममाणिक्यहारावलीलसन्मंडला सूर्यकांतेंदुकांताद्याखरश्मिकंठभूषणा बीज
पूरस्फुरद्बीजदंतपंक्तिरनुत्तमा कामकोदंडकाभग्नभ्रूकटाक्षप्रवर्षिणी मातं
गकुंभवक्षोजालसत्कोकनदेक्षणा मनोज्ञशष्कुलीकर्णा हंसीगतिविडंबिनी
पद्मरागांगदद्योतदोश्चतुष्कप्रकाशिनी नानामणिपरिस्फूर्जच्छुद्धकांचनकं
कणा नागेंद्रदंतनिर्माणवलयांचितपाणिका पट्टांबरपरीधानाकलमंजीर
रंजिता कर्पूरागुरुकस्तूरीकुंकुमद्रवलेपिता विचित्ररत्नपृथिवीकल्पशाखा
तलेस्थिता रत्नद्वीपस्फुरद्रत्नसिंहासननिवासिनी षट्चक्रभेदनकरी पर
मानंदरूपिणी सहस्रदलपद्मांतचंद्रमंडलवर्तिनी ब्रह्माविष्णुशिवक्रोड
नानासुखविलासिनी हरविष्णुविरिंचेंद्रग्रहनायकसेविता शंभयोनिर्ब्र
ह्मयोनिर्भगयोनिरयोनिजा भगरूपा भगस्था च भगिनी भगवासिनी भगा
त्मिका भगाधाररूपिणी भगमालिनी लिंगाभिधायिनी लिंगप्रिया लिंगनि
वासिनी लिंगस्था लिंगिनी लिंगरूपिणी लिंगसुंदरी लिंगस्था लिंगिनी लिं
गप्रिया लिंगसंकाशिणी शिवाशिवा सुरुद्राणी शिवेवाशिवनादिनी मातं

गी भ्रामरी मत्ता मालेवानंगमेखला डाकिनी योगिनी चैव तथा योगिनसंकुला माहे
श्वरी वैष्णवी च भ्रामरी शिवरूपिणी अलंबुषा वेगवती कोडरूपा सुमेखला गांधा
री गजजिह्वा च इडा चैव शुभंकरी पिंगला ब्रह्मसूती च सुषुम्ना गंधिनी लिंग
स्था चैव लिंगेशी त्रिपुरा भैरवी तथा लिंगस्था लिंगिनी शाखा लिंगगीतिस्तथैव च लिं
गमाला लिंगभगा लिंगलिंगा च पार्वती भगवती कौशिकी च प्रेमा चैव प्रियंवदा
गृध्ररूपा शिवरूपा च चक्रेशी चक्ररूपधृक् लिंगगीतिर्महाप्रीतिर्भगगीतिस्सदा
रतिः लिंगनामसरानंदा भगनामसदारतिः लिंगमालाकंठभूषा भगमालाविभूषणा
भगलिंगामृतप्रीता भगलिंगस्वरूपिणी भगलिंगस्वरूपा च भगलिंगसुखावहा
स्वयंभूकुसुमप्रीता स्वयंभूकुसुमार्चिता स्वयंभूकुसुमप्राणा स्वयंभूकुसुमोत्थिता
स्वयंभूकुसुमस्नाता स्वयंभूकुसुमार्पिता स्वयंभूपुष्पघटिता स्वयंभूपुष्पधारिणी
स्वयंभूपुष्पतिलका स्वयंभूपुष्पचर्चिता स्वयंभूपुष्पदरता स्वयंभूकुसुमग्रहा स्व
यंभूपुष्पयज्ञांशा स्वयंभूकुसुमात्मिका स्वयंभूपुष्पनिलया स्वयंभूकुसुमप्रिया

यूपामा॰
६०

स्वयंभूकुसुमा दानलालसोन्मत्तमानसा स्वयंभूकुसुमानंदलहरीस्निग्धदेहिनी स्व
यंभूकुसुमाधारा स्वयंभूकुसुमाकुला स्वयंभूपुष्पनिलया स्वयंभूपुष्पवासिनी स्व
यंभूकुसुमस्निग्धा स्वयंभूकुसुमोत्सुका स्वयंभूपुष्पकारिणी स्वयंभूपुष्पमालिका
स्वयंभूकुसुमन्यासा स्वयंभूकुसुमप्रभा स्वयंभूकुसुमज्ञाना स्वयंभूकुसुमव्रता स्व
यंभूकुसुमध्याना स्वयंभूपुष्पभोगिनी स्वयंभूकुसुमोल्लासा स्वयंपुष्पवर्षिणी स्व
यंभूकुसुमादाना स्वयंभूपुष्पपुष्पिणी स्वयंभूकुसुमोत्साहा स्वयंभूपुष्परूपिणी स्व
यंभूकुसुमोन्मादा स्वयंभूपुष्पसुंदरी स्वयंभूकुसुमाराध्या स्वयंभूकुसुमोद्भवा स्व
यंभूकुसुमव्यग्रा स्वयंभूपुष्पपूर्णिता स्वयंभूपूजकप्रज्ञा स्वयंभूहोतृमातृका स्व
यंभूदधितनत्त्री स्वयंभूभक्तभाविता स्वयंभूपूजकग्रस्ता स्वयंभूपूजकप्रिया स्व
यंभूवंदकाधारा स्वयंभूनिंदकांतका स्वयंभूप्रदसर्वस्वा स्वयंभूप्रदपुत्रिणी स्व
यंभूप्रदसस्मेरा स्वयंभूप्रदवीरिणी सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका
सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा कुंडपुष्पसदाप्रीतिः गोलपुष्पसदा

रतिः कुंडगोलोद्भवप्राणा कुंडगोलोद्भवात्मिका स्वयंभुवा शिवा धात्री पावनी लोकपा
वनी कीर्त्तिः यशस्विनी मेधा विमेधा शुक्रसुंदरी सुखदा मोक्षदा मोक्षा मोक्षदात्म
प्रकाशिनी शुक्राधारा शुक्ररूपा शुक्रसिंधुनिवासिनी शुक्रालया शुक्रभोगा शु
क्रपूजासदारतिः शुक्रपूज्या शुक्रहोमसंतुष्टा शुक्रवत्सला शुक्रमूर्त्तिः शुक्रव
री शुक्रपूजकपुत्रिका शुक्रस्था शुक्रिणी शुक्रसस्पृहा शुक्रसुंदरी शुक्रस्नाता शु
क्रदेहा शुक्रतुष्टा त्रिशुक्रिणी महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी शुक्राभि
धेया शुक्रार्हा शुक्रवंदकवंदिता शुक्रानंदकरी शुक्रसदानादविधायिनी शु
क्रोत्सवा सदा शुक्रपूर्णा शुक्रमनोरमा शुक्रपूजकसर्वस्वा शुक्रनिंदकनाशिनी
शुक्रात्मिका शुक्रसंपत् शुक्राकर्षणकारिणी शारदा साधकप्राणा साधकासक्तमा
नसा साधकानंदसंतोषा साधकारिविनाशिनी साधकोत्तमसर्वस्वा साधकांतक
पापरा आत्मविद्या ब्रह्मविद्या परब्रह्मकुटुंबिनी त्रिकूटस्था पंचकूटा सर्वकू
टाशरीरिणी सर्ववर्णमयी वर्णजपमालाविधायिनी १००० श्रीशिव उवाच
इति श्रीकालिकानाम्नां सहस्रं शिवभाषितं गुह्याद्गुह्यतरं साक्षान्महापातक

नाशनं पूजाकाले निशीथे च संध्ययोरुभयोरपि लभते गाणपत्यं स यः पठेत्सा
धकोत्तमः यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि सर्वपापविनिर्मुक्तस्स याति
कालिकापदं श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत् दुर्गाद्दुर्गतरं तीर्त्वा दे
व्याः पार्श्वचरो भवेत् वंध्या वा काकवंध्या वा मृतवत्सा च यांगना श्रुत्वा स्तोत्रमिदं
पुत्रां लभते चिरजीविनः यं यं कामयते कामं पठेत्स्तोत्रमनुत्तमं देवीवरप्रसादेन
तेन तमाप्नोति नित्यशः स्वयंभूकुसुमैः शुक्लैः सुगंधिकुसुमान्वितैः यवाया वकसि
दूररक्तचंदनसंयुतैः मत्स्यमांसादिभिर्वीर मधुभिस्सान्नपायसैः भक्तोपनीतैः
मंत्रेण साधितैः शक्तिभिस्सह पंचोपचारैर्नैवेद्यैर्बलिभिर्बहुशोणितैः धूपदीपैर्म
हादेवी पूजयित्वा मनोहरैः ततस्तु महामनुस्तोत्रं पठेद्भक्तिसमन्वितः अनन्य
चेतः स्थिरधीः मुक्तकेशो दिगंबरः शवारूढाभिनास्थो वा स्मशानालयमागतः
शून्यालयगतो वापि शय्यास्थो वाशिवात्मकः सभवेत्कालिकापुत्रड भिख्यातिभु
पागतः सर्वविद्यावतां श्रेष्ठो धनेन धनाधिपः वायुतुल्यबलो लोके दुर्जयः श
त्रुमर्दनः सर्वसंकटमुत्तीर्णः सर्वसिद्धिसमन्वितः मधुमत्याह्वयं देव्या सेव्य

मानास्मरोपमः महेशइव योगींद्रस्सर्वसत्वपुरस्कृतः कामिनीकामरूपोसौ
सर्वनारीषु कामुकः जलस्तंभैंद्रवायूनां स्तंभको राजवल्लभः यशस्वी सत्य
विधीमान्समंत्री कोकिलस्वनः बहुपुत्रगजाश्वानां स्वामीश्वरो धार्मिकः कृ
ती मार्कंडेयइवायुष्मान् जरापलितवर्जितः नवयौवनयुक्तः स्यादपि
वर्षसहस्रभाक् बहुकिं कथ्यते तस्य पठतः स्तवमुत्तमं न किंचिद्दुर्लभं
लोके यद्यन्मनसि कल्पितं ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः सर्वमा
शु नरत्येव स्तवस्यास्य प्रभावतः रजस्वलाभगं पश्यंस्तस्मा कालीमहामनुं
स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् परदाररतो वापि मंत्रं तस्मा
पठेत्स्तवं कुबेरइव वित्ताढ्यो जायते मदनोपमः अष्टोत्तरशतं तस्माद्यो
निमामंत्र्य मंत्रवित् संगम्य पठनादस्य सर्वसिद्धीश्वरो भवेत् दिगंबरो
मुक्तकेशः शय्यास्थो भिपुनेनरः ततस्तु त्वां महाकाली खेचरो जायते चि
रात् यदि योषितसंसर्गस्तदा रेतः प्रयत्नतः समुच्चार्य ततोलब्धेनैवसु
स्सर्वसिद्धयः शुक्रोत्तारणकाले तु जपपूजापरायणः श्मशानकालि

कांस्तुत्वा वाणीविलासकविर्भवेत् आलोकयच्चिंतयित्वा विवस्त्रीपरयोषि
तां ह्यनामास्तुत्वा महाकाली खेचरो जायते चिरात् सुरतेषु मनुं ह्यनामास्तुत्वाम
गवत्तीं शिवां सर्वपापैः परित्यक्तो मानवः स्यात्कुकोपमः कुहूः सूर्यौ तु संक्रां
तिश्चतुर्दश्यष्टमीषु च नवम्यां मंगलदिने पठेत्स्तोत्रं तु साधकः भौमावस्यां
निशीथे च चतुष्पथगतो नरः मांसमत्स्यबलिं दत्वा सदुग्धमीनशोणितं त्र
ह्मोत्तरशतं ह्यनामा पठेन्नामसहस्रकं सोऽदर्शनो भवेदास्तु देवगंधर्वसेवितं
येन केन प्रकारेण कालीभक्तिपरायणः स्तंभयेदखिलान्लोकान् राज्ञानमपि
मोहयेत् आकर्षयेद्देवकन्यां वशयेदपि केशवं मारयेदखिलान्द्वेष्टान्
च्चाटयति शात्रवान् नरमार्जारमाहिषच्छागमेषकशोणितैः सास्थिमांसैः
समधुभिः सास्त्रैर्दुग्धपायसैः योनिक्षालितमोयेन भगलिंगामृतेन च
शुक्रैः स्वजाजपांते च कालीं संतर्प्य साधकः सहस्रनामभिः दिव्यैः स्तोत्रैर्भ
क्तिपरायणः मा न वकालिका तस्य सर्वत्र हितकारिणी परनिंदापरद्रो
हपरीवादपराय च खलाय परतंत्राय भ्रष्टाय साधकाय च शिवाभक्ता

यदुष्टाय दूषकाय दुरात्मने हरिभक्तिविहीनाय परदाररताय च पूजाजपविही
नाय स्तुतास्त्रीनिंदकाय च न स्तवं दर्शयेद्दिव्यं संदर्शयाच्छिवहा भवेत् कुलीनाय
महेच्छाय दुर्गाभक्तिपराय च वैष्णवाय विशुद्धाय भक्ताभक्ताय मंत्रिणे अद्वैताने
दरूपाय निवेदितरताय च दद्यात्स्तोत्रं महाकाल्याः साधकाय तदाज्ञया गुरुवि
ष्णुमहेशानामभेदेन महेश्वरीम् समं त्वान्भावयेन्मंत्री मद्दे शानात्र संशयः स शा
क्तः शिवभक्तश्च स एव वैष्णवोत्तमः संपूज्य स्तौति यः कालीमद्वैतभावमावहन्
देव्यानंदे महानंदो देवीभक्तैव भक्तिमान् स एव धन्यो यस्यार्धे महेशो व्यग्रमानसः
कामयित्वा यथाकामं स्तवमेनमुदीरयन् सर्वरोगैः परित्यक्तो जायते मदनोपमः
चक्रं वा स्तवमेतं वा वादयेद्वंगसंगतम् विलिख्यैव विधिवत्साधुः स एव कालिकात
नुः देव्यै निवेदितं यद्यत्तत्तद्भक्षयेन्नरः दिव्यदेहधरो भूत्वा देव्याः पार्श्वंदरो भवेत्
नैवेद्यनिंदकं दृष्ट्वा नृत्यंति योगिनीगणाः रक्तपानोद्य[illegible]तां सर्वमांसास्थि एव
[illegible]द्यताः तस्मान्निवेदितं देव्यै दृष्ट्वा श्रुत्वा तु मानवः न निंदेत्मनसा वाचा स
र्वव्याधिपरांमुखः आत्मानं कालिकात्मानं स एव स्त्री सदाशिवः यस्याल

प्रणामा
६३

येलिख्यतिस्तुतमेतन्नोत्रंभवान्यालिखितंविधिज्ञैः गोरोचनालक्तककुंकुमा
क्ता कर्पूरसिंदूरमधुद्रवेन नतत्रचौरस्यभयंनदस्यो मनोरथोनापूर्णनिवह्निभी
तिः उत्पातवायोरपिनात्रपुंकालक्ष्मीस्वयंतत्रवसेदलोला स्तोत्रंपठन्नेतद
नंतपुण्यंकालीपदांभोजपरोमनुष्यः विधानपूजाफलमेवसम्यक्प्राप्नोति
संपूर्णमनोरथोसौ मुक्ताःश्रीचरणारविंदविमुखाःस्वर्गामिनोभागिनोब्रह्मो
पेंद्रशिवात्मकार्चनरतोवैलोकेपिसंलेभिरे श्रीमच्छंकरभक्तिपूर्वकमहा
कालीपदध्यायिनोमुक्तिःभुक्तिमतीस्वयंस्तुतिपरामुक्तिःकरस्थायिनी २८
इतिश्रीकालीकुलसर्वस्वेश्रीशिवपरशुरामसंवादेश्रीमहाकालीनामसहस्रंसं
पूर्णम् ॥ अथस्तोत्रं ॥ ॐकर्पूरंमध्यमांत्यस्वरपरहितंसेंदुवामाक्षियुक्तं
बीजंतेमातरेतत्त्रिपुरहरवधुस्त्रीकृतंयेजपंति तेषांगद्यानितिचमुखकुहरा
दुल्लसंत्येववाचास्वच्छंदंध्वांतधाराधररुचिरुचिरेसर्वसिद्धिंगतानाम् १
ईशानंसेंदुवामश्रवणपरिगतंबीजमेतन्महेशिबीजंतेद्वंद्वचतायदि
जपतिजडोवारमेकंकदापिजित्वावाचा

मधीशंधनदमपिचिरंमोहयन्नंबुजाक्षीवृंदंचंद्रार्धचूडेप्रभवतिसमहाघोरशावा
वतंसे २ ईशःवैश्वानरस्थःशशधरविलसद्वामनेत्रेणयुक्तंबीजंतेद्वंद्वमन्यद्वि
गलितचिकुरेकालिकेयेजपंति द्वेषारंतेपिपंतित्रिभुवनमपितेवश्यभावंन
यंतिसृक्कद्वंद्वास्रधाराविनिहितनयनेदक्षिणेत्र्यदारेति ३ ऊर्ध्वेवामेकृपा
णंकरकमलतलेच्छिन्नमुंडंतथाधःसव्येभीतिंवरंचत्रिजगदघहरेदक्षिणेकालि
केति अर्पेन्नामवर्णंतवमनुविभवंभावयंतेदैनंदिंथितेषामष्टौकरस्थाःप्रक
टितवदनेसिद्धयस्त्र्यंबकस्य ४ वर्गाद्यंवह्नियुक्तंविधुरतिललितंतत्त्रयंकू
र्चयुग्मंलज्जाद्वंद्वंचपश्चात्स्मितमुखितदधःठद्वयंयोजयित्वा मातर्येयेज
पंतिस्मरहरमहिलेभावयंतःस्वरूपंतेलक्ष्मीलास्यलीलाकमलदलदृशःकाम
रूपाभवंति ५ प्रत्येकंवाद्वयंवात्रयमपिचपरंबीजमत्यंतगुह्यंत्वन्नाम्ना
योजयित्वासकलमपिसदाभावयंतोजपंति तेषांनेत्रारविंदेविहरतिकमला
वक्त्रशुभ्रांशुबिंबेवाग्देवीदेविमुंडस्रगतिशयलसत्कंठपीनस्तनाढ्ये ६
गतासूनांबाहुप्रकरकृतकांचीपरिलसन्नितंबांदिग्वस्त्रांत्रिभुवनविधात्री

त्रिनयनां श्मशानस्थां तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायञ्जनन
निजडचेताअपि कविः ७ शिवाभिःघोराभिःशवनिवहमुंडास्थिनिवहैः परं सं
कीर्णायां प्रकटितचितायां हरवधूं प्रविष्टां संतुष्टामुपरिसुरतेनातियुवतिं स
दा त्वां ध्यायंति क्वचिदपि न तेषां परिभवः ८ वदामः किं वा त्वां जननि वयमुच्चै
र्जडधियो न धाता नापीशो हरिरपि न ते वेत्ति च पदं तथापि त्वद्भक्तिर्मुखरयति
चास्माकममिते तदेतत्क्षंतव्यं न खलु पशुरोषः समुचितः ९ समांस्वस्थीभू
तांडपतिविपरीतां यदि सदा विचिंत्य त्वां ध्यायन्नतिशयमहाकालसुरतां तदा
तस्य क्षोणीतलविहरमानस्य विदुषः करांभोजे वश्या हरवधु महासिद्धिनिवहा १०
प्रसूते संसारं जननि भवती पालयति च समस्तं क्षित्यादि प्रलयसमये संहर
ति च अतस्त्वं धातासि त्रिभुवनपतिः श्रीपतिरहो महेशोऽपि प्रायः सकलम
पि किं स्तौमि भवतीं ११ अनेके सेवंते भवदधिकगीर्वाणनिवहान् विमूढास्ते
मातः किमपि न हि जानंति परमं समाराध्यामाद्यां हरिहरविरिंच्यादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानंदनिरतां १२ धरित्रीकीलालं शुचिरपि समीरो

ऽपि गगनं त्वमेका कल्याणि गिरिशरमणि कालि सकलम् स्तुतिः का ते मातस्निज
करुणया मामगतिकं प्रसन्ना त्वं भूयः पुनरपि न भूयन्मम जनु १३ श्मशानस्थ
स्सुस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमाम्
जपंस्त्वां प्रत्येकं मनुमपि तव ध्याननिरतो महाकालि स्वैरं स भवति धरित्रीपरि
वृढः १४ गृहे संमार्जन्या परिगलितमूलं हि चिकुरं समूलं मध्याह्ने वितरति चिता
यां कुजदिने समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं गजारूढो याति क्षिति
तिपरिवृढः सत्कविवरः १५ समंतादापीनस्तनजघनधृग्यौवनवती रतास
क्तो नक्तं यदि जपति भक्तस्तव मनुम् विवासास्त्वां ध्यायं गलितचिकुरस्तस्य वशगा
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः १६ स्वपुष्पैराकीर्णं कुसुमधनु
षो मंदिरमहो पुरो ध्यायं ध्यायं जपति परमं तावकमनुम् सगंधर्वश्रेणीपतिरि
व कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभवति १७ त्रिपंचारे पीठे
शिवपाव हृदि स्मेरवदनां महाकालेनोच्चैर्मदनरसलावण्यनिरतां समा

श्यामा
६५

युक्तोनक्तंस्वयमपिरतानंदनिरतोनतोयस्त्वांध्यायेज्जननितवसस्यात्स्मरहरः १८
सरोमास्थिस्वैरंपललमपिमार्जारमपिवापरंमैषंचोष्ट्रंनरमहिषयोश्छागमपिवा
बलिंतेपूजायामपिवितरतांमर्त्यवसतांसतांसिद्धिःसर्वाप्रतिदिनमपूर्वाप्रभवति १९
वशीलक्षंमंत्रंप्रजपतिहविष्याशनरतोदिवामातर्युष्मच्चरणयुगलध्याननिपु
णः परंनक्तंनग्नोनिधुवनविनोदेनचमनुंजनोलक्षंसस्यात्स्मरहरसमानःक्षिति
तले २० इदंस्तोत्रंमातस्तवमनुमयंध्याननिरतस्वरूपाख्यंपादांभुजयुगलपूजा
विधियुतम् निशार्धंवापूजासमयमथवायस्तुपठतिप्रलापस्तस्यापिप्रसरति
कविनामृतरसः २१ कुरंगाक्षीवृंदंतमनुसरतिप्रेमतरलंवशस्तस्यक्षोणीप
पतिरपिकुबेरप्रतिनिधिः रिपुःकारागारेकलयतिचतंकेलिकलयाचिरंजीवन्मु
क्तःसभवतिसुभक्तःप्रतिजनुः २२ इतिश्रीवीरभद्रविरचितेदक्षिणकालिकास्त
वसमाप्तः ॥ अथकालिकास्तोत्रं ॥ श्रीभैरवउवाच ॥ महाकालप्रवक्ष्यामिश्रुण्वेकान
रघ्रातंशुभम् यद्गुह्यंपरमंपुण्यंसर्वभयविनाशनम् महतीचेतनामायामहादेवी

जापकः क्रियतेतीर्थसंयुक्तंनित्यमंत्रसहस्रकं ॥ ॐ अस्यश्रीकालिकादेवीदेवता
चतुःश्लोकस्तवेंद्रस्यमहादेवऋषिः शार्दूलंछंदः क्रींबीजं स्वाहाशक्तिःकामप्र
दत्वात्पादनेविनियोगः ॐ वामेकर्णेशशीचदक्षिणेरविगंडस्थलेकुंडलेस्तारामौ
क्तिकहारकंठसुभगेकेचित्प्रसन्नाद्भव व्योनेकुंजरकालिमान्तचपटः स्कंधेचविभ्रा
जतेदंष्ट्राकालकरालचर्चितगणश्रीकालिकायैनमः १ चामुंडेकरचंडमुंडनय
हचंडाट्टहासैर्युतः उद्दीप्तादशनोज्वलाज्वलनिभाकालैःकरालैरवाः ऊर्ध्वेकृशा
कृशानवद्भयकराभीमातिमांसन्नसाश्वचेत्यास्थिरिपुसस्समहृत्तंश्रीकालिका
यैनमः २ हस्तेदक्षिणेचालिपात्ररुचिरब्रह्माकपालेकृतंवामेपाणितलेषुचर्व
णिणादेवारिदैत्यारिकान् ब्रह्मांडेचरक्तमेमध्याचमधुःपानायमत्तःसदा
प्रेताक्रूढमहासमाहितरतैःश्रीकालिकायैनमः ३ दिव्याभूषणभूषितांब
रधरांमालांशिरसोधरांउन्मत्तांमदरक्तपानचमहामुंडाबलिबिभ्रते व्यालैःभू
षणभूषितांस्तनरुचिंनीलांघनांदिंजितेनित्यंरक्तवरप्रदांननिरतांश्रीकालि

श्यामा
६७

कायै नमः इयमां पठते नित्यं वेदश्लोकचतुष्टयम् इप्सितार्थप्रदा नित्यं कविर्भ
वति नित्यशः अष्टम्यां च चतुर्दश्यां पूर्णासंक्रांतौ ग्रहणे शुभे भौमवारे रवौ वारे जी
वन्मुक्तो न संशयः ॥ इति श्रीकालिकाचतुःश्लोकं संपूर्णम् इति श्रीपूर्णानंदपर
महंसविरचिते श्यामारहस्ये चतुर्थपरिच्छेदः ॥४॥ अथ मंत्रसिद्ध्यर्थमादौ पुरश्चरण
विधिः लिख्यते तदुक्तं कालीतंत्रे ॥ आदौ पुरस्क्रियां कुर्यान्नियमेन दिवा शुचिः लक्ष
मेकं जपेद्दिव्यां हविष्याशी यथाविधिः रात्रौ तांबूलपूरास्यः शय्यायां लक्षमा ततः
ततः सिद्धमनो मंत्री प्रयोगार्हो भविष्यति जीवहीनो यथा देही सर्वकर्मसु न क्षमः
पुरश्चरणहीनो हि तथा मंत्राः प्रकीर्तिताः तस्मादादौ पुरश्चर्यां कृत्वा साधकसत्त
मः नानाचारं न कर्तव्यं न चाचारमितस्ततः भूतहिंसा न कर्तव्या पशुहिंसा विशेष
तः बलिदानं विना देवि हिंसां सर्वत्र वर्जयेत् अन्यमंत्रपुरस्कारं निंदां चैव विवर्जयेत्
प्रयोगं च ततः कुर्यात्सर्वं परमडुलभम् स्वतंत्रेपि ॥ दिवा लक्षं शुचिर्भूत्वा हविष्या
शी जपेन्नरः ततस्तद्दशांशेन होमयेद्धविषा प्रिये तर्पयेत्तीर्थतोयेन पयसा स

र्पिषापि वा मधुनान्नादिना मिश्रं तोषयेत्परमेश्वरीं देवीं चाभिषिंचेत्तोयैः तर्पणस्य
दशांशतः तद्दशांशं हविष्यान्नैः भोजयेद्भक्तितः प्रिये कालीमंत्रविदे विद्वान्दक्षिणां
गुरवे नयेत् पापाद्यं कथितं कल्पं वीरकल्पं शृणु प्रिये अन्यत्रापि देवतागुरुभक्तो
नामैकं संभावयंपरा जपेदेकमनाः प्रातःकालान्मध्यदिनावधि यत्संख्यायां समार
ब्धं तत्कर्तव्यमहर्निशम् यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भविष्यति तंत्रांतरे च ॥ सं
ख्यापूतैर्निर्दिष्टैः द्रव्यैः जपसंख्यादशांशतः यथा कुंडे तु जुहुयाद्यथाविधिसमाहितः
अथवा प्रतिहं जप्त्वा तु जुहुयात्तद्दशांशतः ततो होमदशांशेन कुले संपूज्य देवताम्
तर्पणादिकं कार्यमित्यादि कुलार्णवेपि प्रातः शुक्लांबरधरः प्रयुतः शुचिमानसः द्विवा
एवं प्रकर्तव्यं सर्वकामस्य सिद्धये अथैवं विधिना लक्षं प्रजप्य तद्दशांशं तर्पणं दशां
शाभिषेकं तद्दशांशं ब्राह्मणभोजनं कारयेत् एतदशक्तौ होमादिसंख्या द्विगुणजपो
विप्रेण कार्यः क्षत्रियेण त्रिगुणजपः वैश्येन चतुर्गुणः इति तदुक्तं कुलप्रकाशे य
यदंगं विहीयेत तत्संख्याद्विगुणं जपं कुर्वीत त्रिश्चतुःपंचसंख्या नां साधकोत्तमः ॥ अन्य
त्रापि ॥ होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां त्रिगुणादि समी

रितः गुरुं संतोषयेदेवं मंत्रासिद्धिर्निमंत्रिणः अथात्र ब्राह्मणभोजनमवश्यमेव ॥ तदुक्तं
कुलप्रकाशे ॥ एकमंगं विहीयेत मंत्रान्नेष्टमवाप्नुयात् अन्यैश्चतुर्विधैर्दिव्यपदार्थैः षड्रु
सान्वितैः सभोजितेषु विप्रेषु सर्वं हि सफलं भवेत् सम्यक्कृतसिद्धे कर्मत्रयं पंचांगोपास
नेन हि सर्वमंत्रा अपि सिद्ध्यंतीति तत्प्रभावात्कुलेश्वरि अन्यत्रापि सर्वथा भोजयेद्विप्रा
न्कृतयज्ञार्थसिद्धये विप्राराधनमात्रेण व्यंगं सांगं भवेद्यति तंत्रांतरेपि कृत्वा मंत्रज्ञो
यं मंत्री पुरश्चरणसाधकः दशांशं तु प्रकुर्याद्वै यथोक्तविधिना ततः जप्त्वा जप
चतुर्थांशं स्वाहांतं मंत्रमुच्चरन् तत्र होमं दशांशं तु स्वाहांतं तर्पयेज्जलैः कुंभान्व
मुद्दयेति इति पापावंकल्पम् तदुक्तं कुलचूडामणौ अथ वीरकल्या यथा पुनर
श्चरणकालेनु पर्योषाप्रपूज्यते दीक्षिता वस्त्रपुष्पाद्यैर्भोज्यैः पायससंभवैः आ
रंभकाले नियतं स्वयं पक्वान्नभोजनम् नानाविधं पिष्टकं च नानारससमन्वितम् दु
ग्धं दधि घृतं तक्रं नवनीतं सशर्करम् नारिकेलं कपित्थं च नागरंगं सुदर्पणम् निष्पा
कं बीजपूरं च दाडिमीफलमुत्तमम् नानावन्यफलं चैव नानागंधविलेपनम् चंदनं
मृगनाभिं च श्रीखंडं नवपल्लवम् टंकणं लोध्रकं चैव जलजं वनजं तथा नानापुष्पस

मुद्रांतं नानालंकारभूषितम् अन्यगेहं समानीय चार्घोदकविशोधितम् अमृतीकर
णं कृत्वा पाणिक्षेपाद्विमुखं नयेत् प्रान्ते यथा तदुक्तं तत्रैव ॥ ब्राह्मणी क्षत्रिया वैश्या
शूद्रा च कुलभूषणे वेश्या नापितकन्या च रजकी योगिनी तथा विशेषवैदग्ध्ययुताः
सर्वा एव कुलांगना इति अथ दीक्षिता अष्टशक्तीः क्रमेण संस्थाप्य पूर्ववद्दद्यादर्घ्यपा
द्यादिकं स्थापयित्वा अर्घोदकेन ता अभ्युक्ष्य अतमंत्रेण धेनुमुद्रया ता अमृतीकृत्य
अष्टशक्तीः रूपभेदं ज्ञात्वा ब्राह्मण्याद्यष्टशक्तीनां नामभिर्नामकरणं क्रमेण कृत्वा आस
नादिकं दद्यात् तदुक्तं तत्रैव अष्टकन्या रूपभेदं विलोक्य आमन्त्र्य चेष्टितम् ब्राह्मण्या
द्यष्टशक्तीनां नामभिः कृतसंज्ञकाः आसनं प्रथमं दत्त्वा स्वागतं च पुनर्वदेत् अर्घ्यं पा
द्यं च पानीयं मधुपर्कं जलं ततः स्नापयेद्गंधपुष्पाद्भिः केशसंस्कारमाहरेत् धूपयि
त्वा ततः केशान्कौपीनं च निवेदयेत् ततः स्थानांतरे पीठमास्तीर्य पादुकायुगम् स्थ
प्य तत्र समासीनां नानालंकारभूषणैः भूषयित्वानुलेपं च गंधमाल्यं निवेदयेत् ततस्ता
न्नां शक्तिपूजाप्रकारेणोक्तक्रमेण ध्यात्वा तासमर्घ्यं समावाह्य जीवन्यासं कृत्वा गंध
पुष्पधूपदीपपानान्नव्यंजनादिकं दत्त्वा तासां सम्यक्कर्णक्रमेण स्तोत्रं पठेत् तदुक्तं त

तेव ॥ तांतां शक्तिं समानीय सुमूर्च्छितां समानयेत् भोज्यं मंडलमध्ये तु स्वर्ण
पात्रे सुशोभने चर्व्यचोष्यं लेह्यपेयं भोज्यं भक्ष्यं निवेदयेत् अदीक्षिता यदि
भवेत्ततोमंत्रं निवेदयेत् ॥ ॐ मातर्देवि नमस्तेस्तु ब्रह्मरूपधरेनघे कृपया
हर मे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे १ ॥ ॐ महेश्वरवरदे देवि परमानंददायिनि ॥
कृपया हर २ ॐ कौमारि सर्वविघ्नेशि कुमारक्रीडने वने कृपया हर ३ ॐ वि
ष्णुरूपधरे देवि विनतासुतवाहने कृपया हर ४ वाराहि वरदे देवि दंष्ट्रोद्धृतव
सुंधरी कृपया हर ५ ॐ शक्ररूपधरे देवि सुरसंघसुपूजिते कृपया हर ६ ॐ चामु
डे मुंडमालासृक्चर्चिते विघ्ननाशिनि कृपया हर ७ ॐ महालक्ष्मि महामाये क्षोभसं
तापनाशिनि कृपया हर ८ ॐ इतिमातृमये देवि निमित्तिमात्रे दुष्कृते एकेबहुतरे
देवि विश्वरूपेन मोस्तुते एतत्स्तोत्रं पठेद्यस्तु वामकर्णे तु साधकः विघ्नंधावा समा
लोक्यांतस्य विघ्नाविनश्यति कुलीनस्य द्वारि देवाः कथितानव पुत्रक दीक्षाकालेनि
त्यपूजासमयेनार्चयेद्यदि तस्य पूजाः फलं वत्स नीयते यक्षराक्षसैः यदि

योनिरूपं हि कुंडे वै हुत्वा विगतशिमानतः हस्तविस्तारमत्नावन्हुत्वावापितथाप
यः नत्रकार्याहि मंत्रेण स्वाग्रे स्याप्याद्भुतिक्रिया महाकालाय देवाय दद्याच्च पर
मामुतिं एवं मद्येन मांसेन मत्स्येन रुधिरेण च कुलपुष्पेण साद्येन सरक्तेन वि
शेषतः आमिषादिभिरप्येवं श्मशाने जुहुयात्सुधीः कुलसन्ध्यावपि रात्रौ नग्नो
मुक्तकेशो मैथुने वापि संस्थितः प्रकर्तव्यं प्रयत्नेन सर्वकामार्थसिद्धये द्विजाती
नां च सर्वेषां विधिरिव दृष्टोच्यते शूद्राणां च जयाप्रोक्ते रात्रौ विहं महाफलं यद्य
त्कामयते कामं तत्तदाप्नोति निश्चयः कालिकाम्बुतोच अथैहेवं कालिका
मंत्रजपोयः सदा शुद्धात्मा ज्ञानवैराग्ययुक्तः शांभवदीक्षारतः शाक्तो युवा दि
वा ब्रह्मचारी रात्रौ नग्नः सर्वदा मैथुनासक्तमानसः जपपूजादिनियमो योषित्
प्रियकरः शुद्धोदकेन तर्पणं तेनैव पूजनं सर्वदा कालीरूपमात्मानं विभावये
त् स सर्वयोषिदासक्तो भवति अथ पंचमकारेण सर्वमाप्नोति विद्याधनं पा
ण्डित्यं सर्वैश्वर्यं कवित्वं च नान्यः परमपंथा विद्यते ज्ञानाय मोक्षाय तत्सर्वं मन्त्र
तत्रं यत्किंचित् दृष्टापद्दृश्यमानं स्यान्नुत्तमं कालिकातन्त्रे उक्तं तत्सर्वमाप्नो

ति वेदैर्यत्कृतं पापं तन्नश्यति अगम्यागमनं नश्यति सर्वं पापं नश्यति स सर्वं सु
खमाप्नोति स सर्वं जानाति स सर्वसंन्यासी भवति स सर्वमंत्रजापी भवति स सर्व
शास्त्रवेत्ता भवति स सर्वयज्ञकारी भवति स सर्वेषां मित्रभूतो भवति
निर्विकल्पेन मनसा यः सर्वं करोतीति अथैवं विधिना पुरश्चरणं कृत्वा
प्रयोगादिकार्यमिति अथ प्रसंगाद्दीक्षाशुद्धिर्विलिख्यते यतो दीक्षिता श
क्तिसंगाद्विदीवादः अतः अदीक्षिता कुलासंगात्सिद्धि
हानिः प्रजायते तत्कथा अवश्यं चेत्स्यात्तत्तल्पगमनं यदि सत्कुलीनः कथं देव
पूजयेत्परमेश्वरी संशोधनमहत्त्वायोस्यैपुमध्येपुसाधकः हन्ते
ष्टसिद्धिहानिः स्यात्कृष्णा भवति चंडिका तस्मात् शुद्धिं कृत्वा तद्गुणैः पूजादिकं का
र्यमिति अभिषेकाद्देवेच्छुद्धिमंत्रस्योच्चारणात्कृतो रतिकाले
महेशानि दीक्षा वा लेच्छान्यका बालाह्वा यच्च तो वृद्धा अभिषेकं समाचरेत्
सुरया रेतसा वापि जलेन मधुना यथा संमोहे अभिषिंचेत्तारीं चंडां वा मंत्रवर्सि
त्रीं अदीक्षालीसमुच्चार्य शुद्धिमंत्रः सुरेश्वरि उमांशाक्तिं ततो वदेत् प

वित्रेकुरु शंक्षांते मम शान्तिं कुरु प्रिये वह्निजायां समुच्चार्य शुद्धिः मंत्रः सुरेश्वरि
अनेन मनुना देवि अभिषिक्ताः स्त्रियः सदा इच्छामात्रेण भवेत्तासां सर्वसिद्धिमवाप्नुया
त् इह लोके परं भोगं भुक्त्वा मुक्तिमवाप्नुयात् आनीय कन्यकां भद्रां लक्षणलक्षा
विवर्जितां स्वकांतं परकांतं वा दीक्षितां यौवनोन्नतां पूजकः पूजयेन्नित्यं वाम
पार्श्वे निवेश्य च स्वीयकल्पोक्तविधिना न्यासजालं प्रविन्यसेत् ततो जपेन्महा
विद्यां त्रिपुरां नायिकामिति अत्र विशेषो यथा नटी कापालि
का वेश्या रजकी नापितांगना ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका मा
लाकारस्य कन्यापि नव कन्याः प्रकीर्तिताः एतासु कांचिदानीय तत्र तत्र स्वयो
निमंडले पूजयित्वा महादेवीं ततो मैथुनमारभेत् धर्माधर्महविर्दीप्ते आ
त्मानौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहांतो यं
महामंत्रं आरंभे परिकीर्तितः ततो लयेत्स्त्रियां गच्छेद्देवी त्रिभुवनेश्वरी प्रका
शाकाशहस्ताभ्यामवलंब्योन्मनः स्रुचं धर्माधर्मकलास्नेहपूर्णं वह्नौ जु
होम्यहं स्वाहांतो यं महामंत्रः स्त्रुत्यागे प्रकीर्तितः अथाप्यप्रयोगो यथा

श्यामा
१२

निशायां शान्तिपूर्वां ज्ञात्वा वामभागे समानीय नग्नगात्रेषु कल्पान्ते न्यासा
द्विधाय अस्त्रीदिनाचेत्तदा पूर्वोक्ताभिषेकमंत्रेणानीयाद्विनाभिषेकं कृत्वा
नग्नपावाले मे दबुद्धा मूलमंत्रमुच्चरेत् दुर्गशांतिस्तुष्टिः तंत्रोमकारपंचमे
न देवीं संपूज्य पूजान्ते प्रकाशे घ्यादि पठं स्तुत्वा जेदिति अथवा मातृपीठे सा
वरणं देवीं संपूज्य शिवोऽहमिति भावयेत् उभयोः संगमं कृत्वा पूर्ववज्जपा
दिकं कुर्यादित्येकः प्रकारः इति श्रीपूर्णानंदपरमहंसविरचिते श्यामारहस्ये
पंचमः परिच्छेदः अथ मंत्रभेदा निरूप्यन्ते [illegible]तंत्रे कालिकाकल्पे अथा
हविद्यां प्रथमाद्वयं वा नामद्वयं पुटितं वा यो जपेद्भृति स्त्रस्तस्या स्त्रीति नात्र सं
हगति ... सत्यं सत्यं आस्या गुरुं परितोष्य गृह्णीयान्मंत्रराजं गुरुस्तु म
पिशिष्याय सत्कुलीनाय विद्यामज्ञाय सूक्ष्मबोधिने स्पृष्ट्वा स्वयं परिपूज्य
निशायां निष्कवेष्टकाकीशिवगेहे लक्षं तदर्धं वा जपादेयं आदौ प्रणवबी
जं च लज्जामायाचतारकं मध्ये मूलं सदा जप्या जपांते संपुटीकृतं ॐ ॐ
सत्यं सत्यं न संशयः नान्यप्रकारेणासिद्धिर्भवति कालिकामनोरेव नदिति त्रि

पुरामनोर्वा सर्वस्य दुर्गामनोर्वा उमितिशिवं ॐ नमदिति सर्वासां सर्वा विद्यानामिति पूर्वोक्तं
विद्यानस्या ॥ प्रथमबीजद्वयं वा त्रयं वा बीजत्रयपुटितं नाम्मैव जपेदित्यर्थः
कालीतंत्रेऽपि कालीहृदयविद्यां च सिद्धविद्यां सहोदयां पुराद्येन तथा ज्ञता
सिद्धिमापुर्दिवौकसः क्रामाद्यं वह्निसंस्थं मिंदिरानादबिंदुभिः मंत्रराजमि
दं ध्यात्वा दुर्लभं पापचेतसा सुलभं च सतोभक्त्या साधकानां महात्मनां त्रिपु
राक्रमविशेषेण सर्वशास्त्रप्रबोधिका अनया सदृशी विद्या न हि सारस्वतप्र
दा आकर्षणवशीकारमारणोच्चाटनं तथा शांतिपुष्ट्यादिकं सर्वं साधयेदन
या चिरात् त्रियुक्तस्य मनोमापि वर्णितुं नैव शक्यते जिह्वाकोटिसहस्रैस्तु
वक्त्रकोटिशतैरपि अनया सदृशी विद्या अनया सदृशो जपः अनया सदृशं
ध्यानं नभूतं न भविष्यति ध्यानपूजादिकं सर्वं साधनं च पुरश्क्रिया अनिरुद्ध
सरस्वत्या साधनं सर्वमीरितं अत्र विशेषो यथा कुलचूडामणौ पूर्वं बीजं
वरं शक्तिबीजेन मूर्तिकल्पना बहुदीर्घमात्रमंत्रेण कुर्याद् गानिकल्पनां
अत्र अस्या ध्यानं यथा [illegible]तंत्रेऽपि — ॐ ध्यायेत्कालीं करालास्यां दंष्ट्रा

श्यामा
७२

नीलविलोचनां स्फुरच्छवकरश्रेणीकृतकांचीदिगंबरां वीरासनसमासीनां
महाकालोपरिस्थितां अग्निमूलसमाकीर्णरुद्धिनीं चरुनादिनीं मुंडमा
लागलद्रक्तचर्चितां पीवरस्तनीं मदिरामोदनास्फालितकंपिताखिलमेदि
नीं वामेखड्गं तथा मुंडं धारिणीं दक्षिणे करे वराभययुतां घोरवदनां लोल
जिह्विकां शक्तिं च पदसंयुक्तां बाणकर्णविभूषितां शिवाभिर्घोररूपाभिस्से
वितां प्रलयोदितां चंडहासां चंडनादां चंडाख्यानैश्च भैरवैः गृहीत्वा नरकं
कालात्तु जयशत्रु परायणैः सेविताखिलसिद्धौघैर्मुनिभिस्सेवितां परां
एतां तां कालिकां ध्यात्वा स्वहृदये कुलनायकः विनापरपुरावेशविवर्जितः
प्रसर्पिणी यस्मिंश्चित्कुलसिद्धिस्तु जायते वा मलागतिः सर्वसिद्धिप्रदा देवि
हेलया पिहितिं चिंतिता अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते अथ प्रका
रांतरं तद्रूपं कालीमंत्रे अथातः संप्रवक्ष्यामि मंत्रकल्पद्रुमं परं येन ज्ञानेन
विधिवत्सिद्धयोष्टौ भवंति हि यस्य स्मरणमात्रेण वाक्छुचिर्जायते ध्रुवं य
ज्ञानादमरत्वं च लभेन्मुक्तिं चतुर्विधां येन पंजिपरां देवीं नियमेन तु संस्थिताः

देवाः सर्वे नमस्यंति विष्णुनः मानवादयः वृहस्पतिसमो वाग्मी धनेयधनपतिर्भवे
त् कामतुल्यश्च नारीणां रिपूणां च यमोपमः तस्य पादांबुजद्वंद्वं राज्ञां मुकुटरत्न
षिएं तस्य श्रुतिं विलोक्यैव कुबेरोपि गिरस्थितः यदर्तां तु जयेदेवी नियतः पि
तृकानने तस्य चाज्ञाकराः सर्वाः सिद्धयोष्टौ भवंति हि तस्यैव जननी धन्या पिता
तस्य स्वरोत्तमः संप्रदायविदां वक्ता यदर्नां वेत्ति तत्त्वतः अस्याविज्ञायमात्रेण
कुलकोटीसमुद्धरेत् नंदंति पितरः सर्वे गाथां गायंति ते मुदा अपि धन्यः कुले
कश्चित्कुलज्ञानी भवेदिति स धन्यः स च विज्ञानी स कविस्स च पंडितः स कुलीनः
स च सत्री स वशी स च साधकः स ब्राह्मणः स वेदज्ञः सोग्निहोत्री स दीक्षितः स ती
र्थसेवी पीठानां स निवासी स सर्वदः स सोमपायी स व्रती स यज्वा स परंतपः स
संन्यासी च योगी च स मुक्तो ब्रह्मवित्सदा स वैष्णवः स शैवश्च स सौरः स च गाणपः
सर्वविज्ञानवेत्ता च यदर्नां वेत्ति तत्त्वतः तस्मात्सर्वप्रयत्नेन सर्वा वस्याश्च सर्वदा
एनां ध्यात्वा जपेन्मंत्री सुखमोक्षमहाफलं विद्याराज्ञं प्रवक्ष्यामि श्रुत्वा कर्णविधा
रय मायाद्वंद्वं समुच्चयं ऐंद्रास्यं मदनाद्वयं मायाविंद्वीश्वरयुतं दक्षिणे

कालिकेपदं संहारक्रमयोगेन बीजसप्तकमुद्धरेत् एकविंशाक्षरो मंत्रस्तारा
द्यो विश्वप्रपूजितः आकाशं वामकर्णेन युक्तं बिंदुविभूषितं चतुर्थं बीजमाख्यातं
त्रैलोक्यवशकारणं स्वाहांताचत्रयोविंशाक्षरोऽयं मंत्रराजकः स्वाहाविनैव
विंशत्यक्षरः कामदो मनुः विंशत्यर्णा महाविद्या स्वाहाप्रणववर्जिताः ध्यान
पूजादिकं सर्वं दक्षिणवदुपाचरेत् अथान्यप्रकारः अथच
द्वेषमहाविद्यां सिद्धविद्यां महोदयां ईश्वरेण पुरा प्रोक्तां देवीहृदयसंस्थिता अ
स्यास्तात्प्रभावेण कथयामि जगत्त्रयं प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत्
रतिबीजं समुद्धृत्य पपंचमसमन्वितं ठद्वयेन समायुक्तं विद्याराज्ञी प्रकीर्तिता:
अनया सदृशी विद्या कालीमंत्रेषु दुर्लभा भैरवोऽस्य ऋषिः प्रोक्तो विराट् छंदउदी
रितं सिद्धकाली ब्रह्मरूपा देवता परमेश्वरी रतिबीजं बीजमस्या हृल्लेखा शक्ति
रुच्यते हृल्लेखया षड्दीर्घेण प्रणवाद्येन कल्पयेत् अंगषट्कं नमोन्त्यप्रयो
ज्यादेवीशिवोभवेत् ॐ खड्गं छिन्नमुंडं बिबस्रवदसृङ्नरसालावितांगीं त्रिनेत्रां
सव्ये पाणौ कपालोज्ज्वलदसृजमयो मुक्तकेशीं पिबंतीं दिग्वस्त्रां बद्धकांची

मणिमयमुकुटालंकृता दीप्तजिह्वा पायाच्चीलोत्पलाभा रविशशिविलसत्कुंड
लालीढपादा जपेद्विंशतिसाहस्रीं सहस्रैकेन संयुतं होमयेद्दशांशेन प्र
सुपुष्पेण मंत्रवित् त्रिकोणकुंडे मासाद्यसिद्धिविद्यः शिवो भवेत् पूजनं च प्र
योगं च दक्षिणवदुपाचरेत् एकाक्षर्या महाविद्या समानं सर्वमेव वा रक्तपु
ष्पस्य होमेन साक्षाद्वैश्वानरो भवेत् बिल्वपत्रस्य होमेन राज्यं भवति निश्चितं
रक्तप्रसूनहोमेन वशयेदखिलं जगत् पीतपुष्पस्य होमेन स्तंभयेद्वायुम
प्युग्रं मालतीपुष्पहोमेन साक्षाद्वाक्पतिसन्निभः कृष्णपुष्पस्य होमेन शत्रुं
मारयत्यविरात् अत्र सर्वस्य होमेन संख्या स्यादयुतावधि अस्याः स्मरणमात्रे
ण महापातककोटयः सद्यः प्रलयमायांति साधकः खेचरो भवेत् अथ प्रका
रांतरमंत्रः श्मशानकालिकामंत्रं शृणुष्वावहिता प्रिये वा
ग्भवं माया ततो लक्ष्मी कामबीजं ततः परं कालिके संपुटत्वेन चतुष्कं बीजमालि
खेत् एकादशार्णा देवेशि चतुर्वर्गप्रदायिनी ऋषिः भृगुः निवृच्छंदो देवता
कालिका परा श्मशानाद्या चाद्या माया बीजशक्तिर्महेश्वरि कीलकं काम

बीजं स्यान्मुख्यं पूजा बलिं प्रिये । विनस्यन्त्या ध्यानं कुर्वीत कालिकायाः समाहि-
तः । अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीं । त्रिनेत्रां मुक्तकेशीं च शुष्कमां-
सातिभीषणां । पिंगाक्षीं वामहस्तेन मधुपूर्णां कपालिकां । सद्यः छिन्नशिरो द-
क्षहस्तेन दधतीं शिवां । स्मितवक्त्रां सदा चर्ममांसचर्वणतत्परां । नानालंकार-
भूषांगीं महामत्तां सदासवैः । एवं ध्यात्वा यजेद्देवीं श्मशानेषु विशेषतः । गृहे
वापि गृहस्थस्तु मत्स्यैः मांसैः सुभोजनैः । नग्नोऽस्त्वासमहाष्टै पूजां कुर्यात् रात्रौ
समाहितः । पद्मं चाष्टदलं पूर्णं तद्वाह्ये धरणीगृहं । चतुर्द्वारसमायुक्तं मध्ये
त्रिकोणं समालिखेत् । दलेष्वष्टसु विलिखेद्वर्गाद्यष्टवर्गकं । धरण्यां विलिखेद्
द्वारं चतुष्कं च चतुष्टकं । पूर्वादि उत्तराशायां मध्ये देवीं प्रपूजयेत् । ब्राह्म्याद्याः
पूजयेत्साङ्गकुलेष्वष्टासु सर्वतः । भैरवानसितांगाद्यान् धरण्यां पूजयेत्प्रिये
अथासितांगभैरवाय यथा तदुक्तं श्मशानार्णवे असितांगं रुरुं चंडं क्रोधमु-
न्मत्तभैरवं । कपालं भीषणं चैव संहारं चाष्टमं जपेत् । अथास्याः पुरश्चरण-
नियमो यथा तदुक्तं स्वतंत्रे वर्णलक्षं जपेन्मंत्रं तद्दशांशेन होमयेत् ।

वर्णलक्षं मंत्रवर्णसंख्यालक्षं जपमित्यर्थः । रजस्वलास्त्रियं गत्वा रेतोरुधिरसं-
युतं । मद्यं मांसं च विविधं मत्स्यं बहुविधं प्रिये । निवेद्य चात्मसात्कृत्वा कालीभक्ति-
परायणः । तदा सो देवभोगं च लभते नात्र संशयः । अथ मंत्रोत्तमं तदुक्तं काली-
तंत्रे कामबीजं समालिख्य कालिकायै पदं लिखेत् । नमोंतेन च देवेशि सप्ता-
र्णी मनुरुत्तमः । सर्वांगं कालिकादेवी अन्यत्सर्वं तु पूर्ववत् । श्रीगुरोः कृपया मं-
त्री सर्वसिद्धिमवाप्नुयात् । इति श्रीपूर्णानंदपरमहंसविरचिते श्यामारहस्ये
भेदभेदविवरणं नाम षष्ठः परिच्छेदः ६ अथ विद्यामाहात्म्यं तदुक्तं काली-
तंत्रेऽपि एवं समस्तविद्यानां राज्ञी स्तोतुं न शक्यते । वक्त्रकोटिसहस्रैस्तु जि-
ह्वाकोटिशतैरपि । सर्वसिद्धिप्रदा ह्येषा निरुद्धसरस्वती । तस्मादस्याज्ञानमा-
त्रसिद्धयः संभवंति हि । अनिरुद्धसरस्वत्या ज्ञानमात्रेण साधकः । पांडित्ये
च कवित्वे च वागीशसमतां व्रजेत् । तस्य पांडित्यवैदग्ध्यविचित्रपदकल्पना-
त् । देवा अपि विलज्जंते किं पुनः मानुषादयः । अपि चेत्तु समा नारी मत्स-
मः पुरुषः प्रिये । अनिरुद्धसरस्वत्याः समो मंत्रश्च दैवतं । अस्याजपो-
त्

श्यामा
१६

ब्रह्मविद्याज्ञानमध्यात्मचिंतनं योगसाधारणं सम्यक् ध्यानसम्पानसंशयः
महापदि महापापे महाग्रहनिवारणे महाभये महोत्पाते महाशोके महोत्सवे
महामोहे महादुःखे महाविग्रहसंकटे महाशापे महाशत्रौ महाज्ञाने महा
रणे दुराधाने दुरावासे दुर्भिक्षे दुर्निमित्तके समस्तक्लेशसंघाते स्मरणं देव
नाशयेत् अल्पज्ञानं महाज्ञानं ध्यानसम्पन्नदर्शनं तस्मादस्याः समावि
धानात्सिद्धं तंत्रेण संशयः श्मशानशयने वीरः कुलस्त्रीभिर्विहारवान् कुला
श्रितस्सोमनः कालीतत्त्वार्थकोविदः कुलादिभुवने तस्य समोस्ति किंतु ताप
रः सदवस्तु हेतौ लोके सर्व कुलभूषणः धन्याचलनतीतस्य येन देवीस
मर्चिता वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्य सदा गृहे तीर्थानि देहे तिष्ठंति येन दे
वी समर्चिता धनेन धननाथः स्यात्तेजसा भास्करोपमः बलेन पवनो है
ब येन देवी समर्चिता गानेन तुंबुरुः साक्षाद्दाने कर्णसमो मतः दत्तात्रे
य समो ज्ञानी येन देवी समर्चिता वह्निरिव दुराधर्षो गंगेव मलनाशकः
गुहो गुचिसमः साक्षाद्विंदुरिव सुखप्रदः पितृदेवसमः शास्त्रा कालस्य

व दुरासदः समुद्र इव गंभीरो निवृत्तिरिव दुर्धरः बृहस्पतिसमो वक्ता धरणीस
दृशः क्षमी कंदर्पसदृशः कांत्या येन देवी समर्चिता अहो भाग्यमहो लोके कु
लज्ञानी परात्परः तेषां मध्ये च यः कोपि कालीसाधनतत्परः त्वमसि त्वं प
रं चैव दुर्मांसं परमं तथा महेशं च ... चिंताले त्वमसि त्वं जगन्मये कालीज्ञा
...न मासाद्य नत्य... न हि कालीसमा ... न हि कालीसमं जपः
न हि कालीसमं ज्ञानं न हि कालीसमं फलं ये गुणाः परमेशस्य पंचतत्त्वविधान
तः ते गुणाः संति सर्वज्ञे कालीतत्त्वस्य नान्यथा ज्ञानी कालीहृदयविन्मंत्र
साधनतत्परः देवता मानुषो भूत्वा लभेन्मुक्तिं चतुर्विधाम् एतत्ते कथितं
सर्वं कालिकातत्त्वमुत्तमं अनेन सम्यगास्थाय सर्वकामफलं लभेत्
इति श्री श्यामा ... परमहंस ... विरचिते श्यामारहस्ये ... समाप्तः परिच्छेदः ७ अथ कु
लीनामाचार्यो लिख्यते ... अथातः संप्रवक्ष्यामि यत्कृते मत
मश्नुते सर्वस्व तद्धि तेषु ... समयाचारपालकः अनित्यकर्मसंन्यासी नित्या
नुष्ठानतत्परः मंत्रधारणमात्रेण सर्वसिद्धीश्वरो भवेत् परायां देवतायां तु

श्यामा
११

सर्वकर्मनिवेदकः अन्यमंत्रार्चने श्रद्धा अन्यमंत्रस्य पूजनं कुलस्त्रीवीरनिंदां
च तद्द्रव्यस्यापहारणं स्त्रीषु रोषं प्रहारं च वर्जयेन्मतिमान्सदा स्त्रीमयं च ज
गत्सर्वं स्वयं तावत्तथा भवेत् पेयं च खाद्यं तथा चोष्यं भक्ष्यं भोज्यं गृहं सुखं सर्वं वपु
र्वनीत्रूपं भावयेद्यतमानसः कुलजां युवतीं वीक्ष्य नमस्कुर्यात्समाहितः यदि
भाग्यवशेनैव कुलदृष्टिस्तु जायते तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्
बालां वा यौवनोन्मत्तां वृद्धां वा सुंदरीं तथा कुत्सितां वा स्त्रियं दृष्ट्वा नमस्कृत्य
विभावयेत् तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा सर्वथा च न कर्तव्यम
न्यथा सिद्धिरोधकृत् स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव हि भूषणं स्त्रीसंगि
ना सदा भाव्यमन्यथा स्वस्त्रियामपि विपरीतरता सक्ता भाविता हृदयोपरि
तद्भुक्तावचितं भोज्यं देवतायै निवेदयेत् स्त्रीद्वेषो नैव कर्तव्यो विशेषात्पू
जनं महत् जपस्थाने महाशंखं निवेश्य पार्श्वं जपं चरेत् स्त्रियं गच्छेत्स्पृ
ष्ट्वापि विशेषात्कुलजां शुभां गंधं तांबूलमाल्यं च भक्ष्यं द्रव्यं यथारुचिः
भुक्त्वा यथेष्टं भक्त्या निभृतात्मा भक्ष्यं जपं चरेत् दिक्कालानियमो नात्र सं

स्थादिनियमो न च जपेन कालनियमो नार्चादिषु बलिष्वपि स्वेच्छानियम उक्तो
ऽत्र महामंत्रस्य साधने वस्त्रासनस्थानदेहदेहस्पर्शादि वारिणः शुद्धिं नैव
चरेत्तत्र निर्विकल्पमनाश्चरेत् सुगंधिश्वेतलोहित्यकुसुमैरर्चयेत्कलैः बि
ल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः नाधर्मो विद्यते तत्र किंचिद्धर्मो महान्भ
वेत् स्वेच्छाचारोत्र गदितः प्रचरेद्बुद्धमानसः इत्याचारपराः श्रीमान्जपध्या
परायणः पालकः परतत्त्वानां परे तत्त्वे प्रलीयते कौलतंत्रेपि श्रृणु देवि
प्रवक्ष्यामि कौलीनाचरणं यथा पाने भ्रांतिर्भवेद्यस्य घृणा स्याद्रक्तरेतसोः
शुद्धौ चाशुद्धता बुद्धिः पापाशंका च मैथुने स भ्रष्टः स्याज्जयेद्देवी चंडीमंत्रं कथं
जपेत् रोगी दुःखी भवेद्देवि रौरवं नरकं व्रजेत् पंचमात्परं नास्ति शाक्तानां
सुखमोक्षयोः भगरूपा यया देवी रेतः प्रीता सदा नये रेतस्य तर्पणं तस्या
मद्यमांसैस्समं प्रिये केवलैः पंचमैर्देवि सिद्धो भवति साधकः ध्यात्वा कुंड
लिनीशक्तिं रमयेत् रेतो विसर्जयेत् अमंत्रात्तु यदा नारी बलाद्यस्माच्च लभ्यते
आत्मदेहस्वरूपिणा तत्कर्मे मंत्रमुच्चरेत् ततः सा शक्तिरूपा स्यात्तु निम्न

क्तिप्रदायिनी रंभा सत्तुर्वशी मुख्या या नारीगमने भुवि पाताले वा स्थिता या या
वतस्वनाथस्तु कौलिकः तत्रापि वर्ज्या या नार्यस्ताः सांप्रतं वच्मि प्रिये गुरु
देव शिवस्याद्या तत्पत्नी तत्स्वरूपिणी मनसापि कामेनाचारमंत्रेण तत्र वर्जये
